
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

बृ०टी० १

॥श्रीगणेशाय नमः॥ श्रीगणेशं नृसिंहं च शारदां गुरुपंकजं ॥ नत्वा संक्षेपतो वच्मि बृहज्जातकटिप्पणं ॥१॥ शिष्टाचारपालनाय स्वयं पाथ विघ्नसमाप्त्यै चावंतिकाचार्यो वराहमिहरो ऽकल्पब्ध वरो गणितस्कंधानंतरं होराग्रंथं चिकीर्षुरर्को द्वादशभिः शार्दूलविक्रीडितेनाह ॥ मूर्त्तित्व इति ॥ नानाकरस्त्रैलोक्यप्रकाशको रविर्नो ऽस्मभ्यं वाणीं ददातु ॥ सः यः शशभृतश्चंद्रस्य मूर्तित्वे शरीरत्वेन कल्पितः ॥ यतो जलमयश्चंद्रः प्रकाशहीनः तत्र रविकराः प्रतिफलिताः ज्योत्स्ना भवंति ॥ तदुक्तं ॥ सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं ॥ क्षपयंति दर्पणोदरनिहिता इव मंदिरस्यांतरिते ॥१॥ यो मोक्षमार्गेण वर्त्ममार्गभूतः मोक्षभाजो रविं भित्वा गच्छंति ॥ आत्मविदां योगिनां आत्मा तेजोरूपो हृदयांतस्थः ॥ तथा च श्रुतिः ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति ॥ यजतां क्रतु

मूर्त्तित्वे परिकल्पितः शशभृतो वर्त्मापुनर्जन्मनामात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषां ॥ लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥१॥ भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि ॥ होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानामहं स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥२॥

यज्ञः ॥ उक्तं च ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते इति ॥ तथा अमराद्देवाः ज्योतींषि नक्षत्राणि तेषां भर्ता प्रभुः ग्रहनक्षत्राणां तद्दर्शनेन तिमिरयास्तमयौ ॥ तदुक्तं ॥ तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यंबुगोलकाः ॥ प्रभावंतो हि दृश्यंते सूर्यरश्मिविदीपिताः इति ॥ लोकानां विनाशे उत्पत्तौ पालने च प्रभुः ॥ चो ऽवधारणे ॥ अनेकधा यः श्रुतौ पठ्यते ॥ तथा च श्रुतिः ॥ एवं सद्विप्रा बहुधा वदंतीति ॥२॥ अथान्यशास्त्रेभ्यो ऽस्य गुणवत्त्वं शार्दूलेनाह ॥ भूयोभिरिति ॥ बहुभिः प्राज्ञैः । पटुधियां चतुरबुद्धीनां होराशास्त्रफलज्ञापनाय शब्दयुक्तियुक्तेषु शास्त्रेषु बहुवारं कृतेष्वपि होराशास्त्रसमुद्रतरणे भग्नोद्यमानां ॥ अर्थशास्त्रलक्षणं प्लवं नावं प्रारभे करोमि ॥ कथंभूतं ॥ स्वल्पं वृत्तैर्विचित्रं अर्थेन बहुलं ॥ तस्मादुद्यमभंगो नास्ति तेषामिति तात्पर्यं ॥२॥

राम २

अथ शास्त्रस्य प्राक्तनकर्मव्यंजनत्वमिंद्रवज्रयाह ॥ होरेति ॥ अहोरात्रशब्दस्य पूर्वांत्यवर्णलोपाद्धोरात्रविकल्पमेको होरां मेके इच्छंति ॥ मेषाद्यो १ होरांतोतर्भृताः ॥ लग्नस्य च शुभाशुभस्थाने ॥ तच्चाहोरेतिर्भं तं तस्माद्धोरात्रंतर्भं तल्लग्नस्य स्याहोरात्र विकल्पत्वं ॥ प्रयोजनमाह ॥ प्राग्जन्मनिसर्वेनिम्नश्च कर्मणः पाकं होराप्रकटीकरोति ॥ २ ॥ अथ होरायां कालस्यांगानि मेषादी न्यशाइत्येनाह ॥ कलांगानेति ॥ मेषप्रथमा राशयो नवभिः नक्षत्रपादैः प्रमाणं येषां ते अश्विनिप्रथमा अश्विनीप्रभृतिनवनक्षत्र पादाह एकैकस्य मानं ॥ मेषप्रथमा राशयो १ श्वि प्रथमैमैर्युक्ता इत्यर्थः तादृशाः कालस्य धातुरवयवाः तानि यथा ॥ शिरः १ मुखं

होरेत्यहोरात्रविकल्पमेके वांछंति पूर्वापरवर्णलोपात् ॥ कर्मार्जितं पूर्वभवे सदादियत्तस्य पक्तिं समभिव्यनक्ति ॥ ३ ॥
श्र कालांगानि वरांगमाननमुरो हृत्क्रोडवासोभृतो वस्तिः व्यंजनमूरु जानुयुगले जंघे ततोंघ्रिद्वयं मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसंप्रत्ययाः ॥ ४ ॥ मत्स्यौ घटी नृमिथुनं सगदं सवीणं चापी नरोश्वजघनो मकरो मृगास्यः ॥ तौली ससस्यदहना प्लवगा च कन्या शेषाः स्वनामसदृशाः स्व

१ वक्षः ३ हृत् ४ उदरं ५ कटिः ६ नाभिः ७ लिंगं ८ ऊरू ९ जानुनी १० जंघे ११ पादौ १२ चक्रवत्स्थिता राशि १ क्षेत्रं २ गृहं ३ ऋक्षं ४ भं ५ भवनं ६ एते एकमर्थं संप्रतिपत्तिः पर्याया इत्यर्थः ॥ ४ ॥ राशिनां स्वरूपं वसंततिलकेनाह ॥ मत्स्याविति ॥ मीनो मत्स्यो अन्योन्यपुच्छाभिमुखं मत्स्यद्वयं ॥ घटी स्कंधासक्तघटः पुमान् कुंभः । नृमिथुनं स्त्रीपुंसौ मिथुनराशिः पुमान् सगदः सवीणा अश्वजघनश्चतुष्पात् धनुर्धारी नरो धनुः ॥ मृगमुखो मकरः ५ तुलाधारो नाम तुला राशिः ६ धान्याग्निकरा नौस्था कुमारी कन्या राशिः ७ शेषाः मेषवृषकर्कसिंहवृश्चिकाः स्वनामवेदिताः ह्यालयाः सर्वराशयः स्वचराः स्वस्वस्थाने षु चरंति ॥ तथा मेषवृषौ दिवा वनचरौ राशी ग्राम्यो मिथुनो ग्राम्यः ॥ कर्कीं जलचरः । सिंहो वनचरः सस्याग्निर्दहनान्या कन्या तुला ग्राम्याः पात्र ७ वृश्चिको गर्तवासी ९ धन्वी

बृ.टी.
२

अथराशिनवांशद्वादशांशाधिपान्निकृतेनाह॥ क्षितिजेति॥ कुजादयो ग्रहाणां राशीनां मेषादीनां मंशानां च पतयः॥ नवां
शकानाह॥ अजेति॥ मेषाद्याः मेषस्य नवांशाः। मकराद्याः वृषस्य। तुलाद्याः मिथुनस्य। चंद्रभवनं कर्कस्तदाद्याः कर्कस्य॥ एवं सिं
हादीनां चतुर्णां अजमृगतुलाकर्कटाद्याः॥ पुनः धनुराशीनां तद्वत्॥ द्वादशांशानाह॥ भवनसमांशाः द्वादशांशास्त
त्पतयः॥ स्वगृहादेव द्वादश क्रमेण ज्ञेयाः॥६॥ अथ त्रिंशांशाधिपान्युक्तिताग्रहयाह॥ कुजेति॥ अयुजि विषमराशौ पवनाः
पंचाः ५ ते मारुतः। पंचानां कुजः पतिः। समीरणाः पंचाः ५ तेषां शनिः॥ कौर्पिर्वृश्चिकोऽष्टमः तेन ततोऽष्टानां जीवः॥ जूकस्तुल्यः सप्त
मः तेन ततः सप्तानां बुधः॥ लेयः सिंहः पंचमः तेन ततः पंचानां शुक्रः॥ एवं त्रिंशत्॥ युजि समराशौ ते भागाः ग्रहाश्च विपरीताः

क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवो गृहहोराशकपाः॥ अजमृगतौलिचंद्रभव
नादिनवांशविधिः भवनसमंशकाधिपतयः स्वगृहात्क्रमशः॥६॥ कुजरविजगुरुज्ञशुक्रभागाः पवनसमी
रणकौर्पिजूकलेयाः॥ अयुजियुजितु भे विपर्ययस्थाः शशिभवनालिझषांतमृक्षसंधिः॥७॥ क्रियतावुरिजितु
मकुलीरलेयपाथोनजूककौर्प्याख्याः॥ तौक्षिकआकोकेरोहृद्रोगश्चांत्यभं चेत्थम्॥८॥ द्रेष्काणहोरानवभाग
संज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च॥ क्षेत्रं च यद्यस्य सतस्य वर्गो होरेति लग्नं भवनस्य चार्धं॥९॥ श्री॥॥

श्रीः ॥ ते मारुतः पंचानां सूर्य्यो॥ ततः षष्ठानां बुधः। ततोऽष्टौ गुरुः। ततः पंच शनेः ततः पंच कुजस्येति॥ शशीति॥ कर्कालिमीनानां नवमो नवांशो
ऋक्षसंधिसंज्ञको ज्ञेयः॥ प्रयोजनं॥ संधौ पापे शशिनि जन्म स्यादिति॥७॥ अथ मेषादिसंज्ञा आर्ययाह॥ क्रियतेति॥ क्रियो मेषः १ तावुरिर्वृ
षः २ जितुमं मिथुनं ३ कुलीरः कर्कः ४ लेयः सिंहः ५ पाथोनः कन्या ६ जूकः तुला ७ कौर्पिर्वृश्चिकः ८ तौक्षिको धनुः ९ आकोकेरो मक
रः १० हृद्रोगः कुंभः ११ अंत्यभं मीनः १२॥ इत्थं राशीनां संज्ञाः॥८॥ अथ षड्वर्गनिरूपणमिंद्रवज्रयाह॥ द्रेष्काणेति॥ द्रेष्काणस्य पूर्वप्रदर्शितग्रहस्य
वर्गसंज्ञाः॥ द्रेष्काणो राशित्रिभागः॥ होरा राश्यर्धं नवभागो नवांशः। त्रिंशांशः त्रिंशो भागः॥ द्वादशांशः द्वादशो भागः॥ यस्य ग्रहस्य यत्क्षेत्रं राशिः स तस्य

अथ संक्षेपेण राशिसंज्ञाश्च लग्नादिकं चाह ॥ गोजेति ॥ वृषमेषधनुः कर्कमिथुनमकरा रात्रिबलसंज्ञाः ॥ मिथुनरहिता स्तएव पृष्ठोदयाः पृष्ठेनोदयंती सर्पः ॥ शेषाः सिंहकन्यातुलालिकुंभा मिथुनश्च शीर्षोदयाः शिरसोद्गच्छंति ॥ कुंभांता दिनबलाश्च ॥ मीन उभयतः ॥ ... वीर्या उद्गच्छति ॥ १० ॥ अथ क्रूरादिसंज्ञा मेषादिकानाह ॥ क्रूर इति ॥ मेषाद्या विषमाः क्रूराः ॥ वृषाद्याः समाः सौम्या नार्यश्च ॥ तथा मेषाद्याः क्रमाच्चरस्थिरद्विस्वभावसंज्ञकाः । एवं कर्कादयस्तुलाद्या मकराद्याश्च ॥ प्रागादीशा इति ॥ मेषवृषमिथुन कर्काः स्वत्रिकोणाः ... युताः प्रागादीश्वराः ॥ तेन मेषसिंहधन्विनः पूर्वेशाः ॥ वृषकन्यामकरा दक्षिणेशाः ॥ मिथुनतुलाकुंभाः

गोजाश्विकर्किमिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव ॥ शीर्षोदया दिनबलाश्च भवंति शेषाः लग्नं समे तु भयतः पृथुरोमयुग्मं ॥ ९ ॥ क्रूरः सौम्यः पुरुषवनितेते चराद्विदेहाः प्रागादीशाः क्रियवृषनृयुक्कर्कटाः स त्रिकोणाः ॥ मार्तंडेंद्वोरयुजिसमभे चंद्रभान्वोस्तु होरे द्रेष्काणास्तु स्वभवनसुतत्रित्रिकोणाधिपानां ॥ १२ ॥ केचित्तु होरां प्रथमामिपस्य वांछंति लाभाधिपतेर्द्वितीयां ॥ द्रेष्काणसंज्ञामपि वर्णयंति स्वद्वादशैकादशराशिपानां ॥ १२ ॥

५ अजवृषभमृगांगनाकुलीरा झषवणिजौ च दिवाकरादितुंगाः ॥ दशशिखिमनुयुक्तिथींद्रियांशैः त्रिनवकविंशति

भिश्च तेस्तनीचाः ॥ १३

पश्चिमेशाः ॥ कर्कालिमीना उत्तरेशाः ॥ विषमराशौ सूर्येन्दोर्होरे । समराशौ चंद्रसूर्ययोः ॥ राशित्रिंशन्नामाद्यद्रेष्काणः स्वेस्य द्वितीयः पंचमाधिपतेः । तृतीयो नवमाधिपतेः ॥ ११ ॥ अथ होराद्रेष्काणयोर्मतांतरमिंद्रवज्रयाह ॥ केचिदिति ॥ स्वेशाल्लाभेशा यो होरे वदंति केचित् ॥ स्वेशाद्द्वादशेशाल्लाभेशानां द्रेष्काणांश्च वदन्ति केचित् ॥ १२ ॥ अथ ग्रहाणामुच्चनीचान्निपुष्पिताग्रयाह ॥ अजेति ॥ मेषवृषमकरकन्याकर्कमीनतुलानां दश १० त्रि ३ चतुर्दश १४ युग्म २८ पंचदश १५ पंच ५ सप्तविंशति २७ विंश २० संख्येषु रव्याद

पं: क्रमात्परमोच्चाः उच्चस्थानात्सप्तमराशीनांद शांशेषु परमनीचाः ॥ १३ ॥

बृ॰टी॰
३

अथ ग्रहाणां वर्गोत्तमस्वत्रिकोणानि वसंततिलकेनाह ॥ वर्गेति ॥ चराणां प्रथमो १ नवांशः ॥ स्थिराणां पंचमो ५ द्विस्वभावानां नवमः ९ अ वर्गोत्तमसंज्ञः सशुभदायी ॥ सिंहवृषमेषकन्याधनुस्तुलाकुंभाः रव्यादीनां स्वत्रिकोणानि ॥ १४ ॥ अथ लग्नादीनां संज्ञा वसंततिलकेनाह ॥ होरादय इति ॥ तनुः १ कुटुंब २ भ्राता ३ बंधुः ४ पुत्रः ५ शत्रुः ६ पत्नी ७ मृतिः ८ धर्मः ९ आस्पदं १० लाभ ११ रिष्फं १२ लग्नादीनां नामानि ॥ षष्ठदशमैकादशात्तृतीयानि उपचयाख्यानि ॥ एके उपचयत्वमेतेषां नित्यमिति वदन्ति ॥ पापैः

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यंतगाः शुभफलाः नवभागसंज्ञाः ॥ सिंहो वृषः प्रथमषष्ठहयांगतौलिकुंभौः त्रिकोणभवनानि भवंति सूर्यात् ॥ १४ ॥ होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानि शुभास्पदायाः ॥ रिष्फाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥ १५ ॥ कल्पस्वविक्रमगृहप्रतिभाक्षतानि चित्तोत्थरंध्रगुरुमानभवव्ययानि ॥ लग्नात् चतुर्थनिधने चतुरस्रसंज्ञे द्यूनं च सप्तमगृहं दशमं खमाज्ञा ॥ १६ ॥ कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानां ॥ तेषु यथाभिहितेषु बलाढ्याः कीट

स्वामिशत्रुनाच दृष्टेनोपचयत्वमिति भावः ॥ १५ ॥ लग्नादीनां नामंतराणि व्यवहारायवसंततिलकयाह ॥ कल्पेति ॥ कल्पं १ स्व २ विक्रम ३ गृह ४ प्रतिभा ५ क्षतं ६ चित्तोत्थं ७ रंध्रं ८ गुरुः ९ मानं १० भवः ११ व्ययं १२ लग्नादिनामानि ॥ लग्नाच्चतुर्थाष्टमे चतुरस्राख्ये ॥ सप्तमं ७ द्यूनं ॥ दशमं खं १० संज्ञा च ॥ अथ केंद्रादिनस्थराशीनां बले च होधकेनाह ॥ कंटकेति ॥ लग्नाच्चतुर्थसप्तमदशमानां कंटककेंद्रचतुष्टेति संज्ञात्रयं ॥ कीटो वृश्चिकः सप्तमस्थो बली ॥ मिथुनकन्यातुलाधनुः पूर्वार्द्धकुंभो नराशयस्ते लग्नस्था बलिनः ॥ कर्कमीनमकरापरार्द्धजलचरास्ते चतुर्थे बलिनः ॥ मेषवृषधनुरपरार्धमकरपूर्वार्द्धाः पशवस्ते दशमस्था बलि

५ अथोपचयसंज्ञारव्यानि लाभे क्षमर्णेः ॥ न चेम भवंति ते दृष्टा पापस्य स्वामिना शुभैः ॥ १ ॥ ५
प्टपु

तेषु यथाभिहि
तेषु यथो तेषु

राम
३

अथ स्वसंज्ञा वसंततिलकेनाह ॥ केंद्रमिति ॥ केंद्रात्परेषां द्वितीयपंचमाष्टमैकादशानां पणफरसंज्ञा ॥ तत्परेषां तृतीयषष्ठनवमं
द्वादशानामापोक्लिमसंज्ञा ॥ हिबुकं तु सुखवेश्मसंज्ञाश्चतुर्थस्य ॥ अस्तजामित्रे सप्तमस्य ॥ त्रिकोणं पंचमस्य ॥ मेषूरणं क सुतभं
र्मेति संज्ञा दशमस्य ॥ १८ ॥ होरादीनां बलं शार्दूलविक्रीडितेनाह ॥ होरेति ॥ स्वस्वामिगुरुबुधदृष्टा वा होरा बलवती ॥ अन्ये
खला: ॥ उभये मध्यबला: ॥ केंद्रस्थाः स्वचारित्राद्बोध्य: ॥ केंद्रस्थाः सर्वे राशयो बलिनः ॥ पणफरगा मध्यबला: ॥ आपोक्लि
मगाः हीनबला ॥ अत्र केंद्रस्था द्विपदादयो बलिन इति केचित् ॥ व्याचक्षते तदयुक्तं ॥ वादरायणविरोधात् ॥ तथा च तदुक्तं ॥

केंद्रात्परं पणफरं परतस्तु सर्वमापोक्लिमं हिबुकमंबु सुखं च वेश्म ॥ जामित्रमस्तभवनं सुतभं त्रिकोणं मेषूरणं
दशममत्र च कर्म विद्यात् ॥ १८ ॥ होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा केंद्रस्था द्विपदादयो नि
ष निशि च प्राप्ते च संध्याद्वये ॥ पूर्वार्धे विषयादयः कृतगुणमानं भवंती पंच तत्तद्वश्चिक्यं सहजं तपश्च नवमं त्रि
धं त्रिकोणं च तत् ॥ १९ ॥

केंद्रस्थास्तु अतिबलाः मध्यबलाः पणफराश्रिताः ॥ ज्ञेयाः आपोक्लिमगाः सर्वे हीनबला राशयः ॥ कथिता इति ॥ अन्ये नि
शि संध्याद्वये च क्रमाद्द्विपदचतुष्पदकीटा वीर्योत्कटा इत्यनुवर्तते ॥ स्त्रिने द्विपदा: ॥ निशि चतुष्पदा: ॥ संध्ययोः कीटा: ॥ कीट
श्चाप्यस्याप्युपलक्षकः ॥ पूर्वार्धे इति ॥ विषयादयः पंचादयः ५।६।७।८।९।१० एते चतुर्गुणा २०।२४।२८।३२।३६।४०
३२० । एकमनेन पुनः दशगुणिता २००।२४०।२८०।३२०।३६०।४०० षष्टिभक्तं मेषादिमानं ॥ एतन्मेषादिषट्कमानं ॥ व्यस्तया तुलादिमा
नं ॥ इदं नष्टचिन्तादौ नरावयवज्ञानाय ॥ दुश्चिक्यं सहजे तृतीयस्य संज्ञे ॥ तपस्त्रित्रिकोणं नवमस्य ॥ १९ ॥ राशिवर्णा
न् मंदाक्रांतयाह ॥ रक्तेति ॥ रक्तो मेषः १ वृषः २ पीतः ॥ मिथुनो ३ हरिद्वर्णः ॥ कर्कः ४ ईषद्रक्तः ॥ सिंहः ५ ईषच्छुक्लः ॥ कन्या ६

मे

बृ० टी०
४

नानावर्णः तुला ७ कृष्णः वृश्चिकः ८ पीतः धनुः ९ कपिलः मकरः कर्बुरः कुम्भः कपिलः मीनः स्वच्छवर्णः शबलः स्वामिनोया
दिक्तत्र सर्वराशीनां प्लवलक्षणेयं ॥ तथाहि ॥ मेषवृश्चिकौ दक्षिणप्लवौ ॥ वृषतुले आग्नेयप्लवे ॥ मिथुनकन्ये उत्तरप्लवे ॥ कर्कमे
वायव्यप्लवः ॥ सिंहः पूर्वाप्लवः ॥ धन्वीमीनौ ईशानप्लवौ ॥ मकरकुंभौ पश्चिमप्लवौ इति ॥ एतन्नष्टादिषु चौरादेस्तद्दिङ्मुख
गमनं ॥ प्रयोजनं ॥ रविराशेर्द्वितीयभवनं वेशिसंज्ञं ॥ यात्रायां शुभं ॥ २० ॥ ०००० इति श्रीमहीधरकृते बृहज्जातकविव
रणे प्रथमोध्यायः ॥ १ ॥ कालं गानीत्यादिना राशीनां कालांगलेनोक्ते ॥ चराचरं जगद्ग्रहमयमेव ग्रहाणां राशीशला

रक्तः श्वेतः शुकतनुनभः पाटलो धूम्रपांडुः चित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च बभ्रुः स्वच्छः प्रथमभ
वनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यं दिनकरयुताद्वा द्वितीयं च वेशिः ॥ २० ॥ इति श्रीवराहमिहिराचार्यविरचिते
बृहज्जातके राशिप्रभेदाध्यायः ॥ १ ॥ कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखे सि
तश्च मदनो दुःखं दिनेशात्मजः ॥ राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः सूरिर्दानवपूजितश्च सचि
वौ प्रेष्यः सहस्रांशुजः ॥ १ ॥ हेलिः सूर्यश्चंद्रमाः शीतरश्मिर्हेम्नो वित् ज्ञो बोधनश्चेंदुपुत्रः ॥ आरो वक्रः क्रूरदृक्
चावनेयः कोणो मंदः सूर्यपुत्रोसितश्च ॥ २ ॥
त ॥ तस्यात्मरीत्यभावान् राजादिश्च विश्वपालकान् ग्रहरूपानेव शार्दूलविक्रीडितेनाह ॥ कालात्मेति ॥ कालस्यात्मा रवि
चं द्रो मनः ॥ कुजः सत्वं ॥ बुधो वाक् ॥ गुरुर्ज्ञानसुखे ॥ शुक्रः कामः ॥ शनिः दुःखं ॥ न केवलं कालाव यवा मेषाद्याः ग्रहा अपि
तस्यात्मादयः स्युरर्थः ॥ प्रयोजनं ॥ जन्मनि प्रश्ने चोपचयस्थाः कार्यस्य साधकाः अन्यथा हानिकराः ॥ १ ॥ अथ ग्रहसंज्ञा श
लिन्याह ॥ हेलिरिति ॥ हेलिरिति सूर्यनाम ॥ शीतरश्मिरिति चंद्रस्य ॥ हेम्नः ॥ वित् ॥ ज्ञः ॥ बोधनः एता बुधस्य संज्ञाः ॥ आरः वक्रः
प्रयोजनं ॥ पीडितं यह देन सत्र गपी डितं ॥ पुष्टेपुष्टिः ॥ शनैर्वैरी सकिंच ॥ रविचंद्रौ नृपौ ॥ कुजः सेनापतिः बुधो युवराजः ॥ गुरुशुक्रौ मंत्रिणौ शनिर्दासः ॥ २ ॥ टी ॥

7

अन्येषां संज्ञा ग्रन्थान्तर तिलकेनाह ॥ जीवेति ॥ जीवः ॥ अंगिराः ॥ सुरगुरुः ॥ वाचस्पतिः ॥ ईज्यः ॥ एताः गुरोः ॥ भृगुः ॥ भृगुसुतः ॥ सितः ॥ आस्फु
जित् एताः शुक्रस्य ॥ तमः ॥ अगुः ॥ असुरः एताः राहोः ॥ शिखीति केतोः ॥ अन्ये पर्याया लोकतो बोध्याः ॥ ३ ॥ अथ ग्रहवर्णान् शालि
न्याह ॥ रक्त इति ॥ रक्तः श्यामो भास्करो गौर इन्दुः ॥ श्वेतवर्णश्चन्द्रः ॥ नातिदीर्घो रक्तगौरः । पद्मपत्राभो भौमः ॥ हरिद्वर्णो
बुधः ॥ गौरो गुरुः ॥ शुक्रो दूर्वागौरः ॥ कृष्णः शनिः ॥ प्रयोजनं सर्वग्रहेषु यो बलवान् तद्वर्णो नरः स्यात् ॥ ४ ॥ अथ ग्रहाणां वर्णदिशा
इन्द्रविक्रीडितेनाह ॥ वर्णा इति ॥ ताम्रादयो वर्णाः सूर्यादिनाथाः । सूर्यस्य ताम्रः स्वामिनोऽयेषां ते । ताम्रस्य रविर्नाथः ॥ सितस्य चन्द्रः

जीवोंऽगिरास्सुरगुरुर्वचसां पती ज्यो शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ॥ राहुस्तमोऽगुरसुरश्च शिखी च केतुः
पर्यायमन्यमुपलभ्य वदेत्तु लोकात् ॥ ३ ॥ रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः ॥ दू
र्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः ॥ ४ ॥ वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रा
सिता वह्न्यम्बुग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् ॥ प्रागाद्याः रविशुक्रलोहिततमःसौरीन्दुवित्सूर
यः क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युताः ॥ ५ ॥
२ अतिरक्तस्य कुजः ॥ हरितस्य बुधः ४ पीतस्य गुरुः ५
चित्रवर्णस्य शुक्रः ६ कृष्णस्य शनिः ७ बलवद्ग्रहस्य वर्णो द्रव्यलाभः ॥ प्रयोजनं ॥ वन्ह्यादयो रव्यादिनाथाः ॥ यथा ॥ रवे
रग्निर्नाथः ॥ चन्द्रस्य जलं २ भौमस्य वसुधा ३ बुधस्य हरिः ४ गुरोरिन्द्रः ॥ ५ शुक्रस्येन्द्राणी ६ शनेः प्रजापतिः ७ ॥ इन्द्रस्तार्क्ष्यो
रग्निर्नाथः ॥ ... ॥ शनिः पश्चिमायाः ॥ चन्द्रो वाय
प्रागादिदिशां रव्यादयो नाथाः ॥ रविः प्राच्यां १ शुक्रः आग्नेय्यां २ कुजो दक्षिणस्यां ३ राहुर्नैर्ऋत्यां ४ शनिः पश्चिमायाः ॥ चन्द्रो वाय
व्यां ६ बुधः उदीच्यां ७ गुरुरैशान्यां ८ क्षीणचन्द्ररविकुजशनयः पापास्तद्युतो बुधश्च । शेषाः सौम्याः कृष्णा ...

ग्र० ला० टी० ५

बृ॰ टी॰
५

ग्रहाणां कृतिमूलपतिलं चोपछंदसिके नाह ॥ बुधेति ॥ बुधशनी क्लीबौ । शशिशुक्रौ स्त्रियौ ॥ रविकुजजीवाः नराः ॥ कुजोग्नेः स्वामी ॥ भुवो बुधः २ नभसो जीवः ३ जलस्य शुक्रः ४ । वायोः शनी पर विचंद्रौ वर्ष्मांबुनोः इति पूर्वमुक्तं ॥ १६ ॥ अथ वर्णाधिपत्वं गुणविभागं चोपजात्याह ॥ विप्रेति ॥ शुक्रगुरू विप्रपती ॥ कुजरवि क्षत्रियपती ॥ शशी विशांपतिः ॥ बुधः शूद्रपतिः । शनिः अंत्यजपती एषामुपधातेतद्गुणो पयाते ॥ चंद्रार्कगुरवः सत्वं । बुधशुक्रौ रजः ॥ कुजशनी तमः ॥ प्रयोजनं । त्रिंशांशेयस्य भास्करः तादृगिति ॥ ७ ॥ अथ चन्द्रार्कयोः रूपं तोटकेनाह ॥ मधुरिति ॥ मधुनिभनेत्रः ॥ प्रसारितभुजद्वयः । पित्ताधिको । विरलकेशो रविः रुक्षवर्णो वर्त्तुलांगः ॥ वातकफाधिकः ॥ मेधावी । कोमलवाक् सुंदरनेत्रो विधुः चंद्रस्य ॥ ८ ॥ कुजबुधयोरूपं स्वागतमाह ॥ क्रूरेति ॥ क्रूरनेत्रो युवा हासतापिताधिको स्थिरचित्तस्तनूदरः कुजः ॥ गद्गदभाषी हासशीलो दोषत्रयो लग्नस्वभावो बुधः ॥ ९ ॥ जीवशुक्रयोरूपं वंशस्तेनाह ॥ बृहदिति ॥ स्थूलांगः पिंगलकेशनेत्रो धार्मिकमतिः कफाधिको

बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः ॥ शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण ॥ ६ ॥ विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोपराणां ॥ चंद्रार्कजीवाज्ञसितौ कुजार्की यथाक्रमं सत्वरजस्तमांसि ॥ ७ ॥ मधुपिंगलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः ॥ तनुवृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक् शुभदृक् ॥ ८ ॥ क्रूरदृक् तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः ॥ श्लिष्टवाक् सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च ॥ ९ ॥ बृहत्तनुः पिंगलमूर्द्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः ॥ भृगुः सुखी कांतवपुः सुलोचनः कफानिलात्मासितवक्रमूर्द्धजः ॥ १० ॥ ॥ श्री ॥ ॥

ग्री ३

राम
५

अथ शनिरूपं ग्रहाणां धातुरूपं वसंततिलकेनाह ॥ मंद इति ॥ कार्यपटुः पीतनेत्रो दुर्वल अरे होदीर्घदंतो रूक्षतनूरुहकेशो वाताधिकः शनिः धात्वाह ॥ शनिः स्नायुः रविः अस्थीनि । रुधिरं चंद्रः । त्वक् वुधः । रेतः शुक्रो मेदो गुरुः । मज्जा कुजः ॥ ११ ॥ स्थानवस्त्रप्रभुत्वं शार्दूलेनाह ॥ देवेति ॥ अर्कादीनां देवादिस्थानानि ॥ देवस्थानं रवेः । जलस्थानमिन्दोः । अग्निस्थानं कुजो । क्रीडास्थानं च वुधः । भांडारं गुरोः । शयनस्थानं शुक्रस्य । अवकरस्थानं उसरं शनेः ॥ वलवति ग्रहे यग्रहस्थाने प्रश्नवस्थानं ॥ हृतनष्टादे चौरस्थानं चज्ञेयं ॥ स्थूलवासो रवेः ॥ नवमिंद्रोः ॥ अग्निदग्धं कुजस्य । जलक्लिन्नं वुधस्य । नातिजीर्णं गुरोः

मंदोलसः कपिलदृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा ॥ स्नायस्थपसृग्त्वथ शुक्रवसेच मज्जा मंदार्कचंद्रवुधशुक्रसुरेज्यभौमाः ॥ ११ ॥ देवांबु अग्निविहारकोशशयनक्षितुलकेशाः [illegible] स्थूलम
भुक्तमग्निकहृतं मध्यं दृढं स्फाटितं ॥ ताम्रं स्यान्मणिहेमयुक्तिरजता न्यर्कोच्च मुक्तायसी द्रेष्काणैः शिशिरा
द्यः शशुकुचज्ञगवादिस्यधस्तुवा ॥ १२ ॥ त्रिद्शत्रिकोणचतुरश्रसप्तमान्यवलोकयंतिचरणाभिवृद्धितः ॥
रविजामरेज्यरुधिराः परेचयेक्रमशोभवंतिकिलवीक्षणाधिकाः ॥ १३ ॥

दृढं शुक्रस्य । जीर्णं शनेः ॥ सूतिकावस्त्रज्ञाने प्रयोजनम् ॥ ताम्रं रवेः मणिरिंदोः २ हेमकुजस्य ३ कांस्यादि वुधस्य ४ रूप्यं गुरोः ५ मुक्ता शुक्रस्य ६ लोहं शनिः ॥ सूतिकागारे वलवद्ग्रहस्य द्रव्यसत्ता ॥ हृतनष्टादिद्रव्यज्ञाने प्रयोजनं ॥ शनिशुक्रकुजचंद्रवुधगुरूणां लग्नेषु शिशिरादयो ऋतवो ज्ञेया ॥ वहुषु ॥ वलवतः । ग्रहाभावे लग्न द्रेष्काणेशो ग्राह्यः ॥ नष्टजातके हृतनष्टचिंतायां च प्रयोजनम् ॥ १२ ॥ अथ ग्रहदृष्टिं वहर्षिण्याह ॥ त्रिदशेति ॥ यत्रस्थाने ग्रहा स्थितास्तत स्त्रितीयदशमस्थाने पाददृष्ट्या पश्यंति शनिः पूर्णं । नवपंचमे अर्द्धदृष्ट्या पश्यंति । गुरुः पूर्णं ॥ अष्टमचतुर्थे पादोनदृष्ट्या पश्यंति । कुजः पूर्णं ॥ परे अर्कचंद्रवुधशुक्राः सप्तमं

बृ०जा०टी०
६

अथकालज्ञानं वैतालिकेनाह॥ अयनेति॥ सूर्यादिभ्योऽयनादिकालनिर्देशः॥ सूर्यस्यायनं। चंद्रस्य क्षणः। कुजाद्दिनं। बुधादृतुः। गुरोर्मासः। शुक्रात्पक्षः। शनेर्वर्षं॥ प्रयोजनं॥ प्रश्नलग्नात्॥ यस्य ग्रहस्य नवांशस्तत्कालः शुभाशुभफलं वाच्यम्॥ प्रश्नलग्ने यस्य ग्रहस्य नवांशकोदयः स ग्रहस्तस्माच्च वांशका यावत्संख्येन वांशको भवति। तत्संख्योऽयनादिको ग्रहोपलक्षितकालः। शुभाशुभं पंक्तौ वाच्यः॥ अन्ये तु लग्ने यावत्संख्यान्नवांशका उदितास्तावत्संख्योऽयनादिकालो नांशकपतिवशाद्वक्तव्यः॥ तथा च मणित्थः॥ लग्नांशकपतितुल्यः कालो लग्नोदितांशसंख्या॥ वक्तव्यो रिपुविषये गर्भाधानेऽथ कार्यसंयोगे इति॥ कटु

अयनक्षणवासरर्तवो मासोऽर्धं च समाश्च भास्करात्॥ कटुकलवणतिक्तमिश्रिता मधुराम्लौ च कषाय
इत्यपि॥ १४॥ जीवो जीवबुधौ सितेन्दुतनयौ व्यर्का विभौमाः क्रमाद्वीन्द्वर्का विकुजेन्द्विनाश्च सुहृदः केषांचिदे
वं मतं॥ सत्योक्ते सुहृदः त्रिकोणभवनात्स्वात्स्वान्त्यधीधर्मपाः स्वोच्चायुःसुखपाः स्वलक्षणविधेर्नैव विरोधादिति॥१५॥

कल्पयेत्स्यादि॥ रवेः कटुरसः॥ चंद्रस्य लवणं। कुजस्य तिक्तः॥ बुधस्य मिश्रः। गुरोर्मधुरः॥ शुक्रस्याम्लः॥ शनेः कषायः॥ प्रयो
जनं॥ आधानकाले यो बलवान्स तद्रसरुचिर्गर्भिणी भवतीति॥ १४॥ अथ मित्रामित्रादिशाईशालविक्रीडितेनाह॥ जी
वेति॥ सूर्यादीनां जीवाद्यो मित्राणि॥ तान्याह॥ रवेर्जीवो मित्रं। विधोर्जीवबुधौ। कुजस्य सितबुधौ। बुधस्य रविविहीनाः
सर्वे। गुरोः कुजविहीनाः सर्वे। शुक्रस्य रवीन्दुहीनाः सर्वे। शनेः रवीन्दुकुजहीनाः सर्वे मित्राणि॥ केषांचिदेवं मतं॥ सत्या
चार्यमते तु स्वमूलत्रिकोणात्॥ धनांत्यसुतधर्मस्वामिनः स्वोच्चाधीशोऽर्थान्मूलत्रिकोणाच्चाष्टमचतुर्थेशाः सर्वे
षां मित्राणि॥ तत्र विशेषः॥ द्विराशीशो मित्रं। एकराशीशो मध्यमः। अनुक्तराशीशोऽरिः॥ रविचंद्रावेकराशीशावपि मि
त्रे। द्विराशिशत्वाभावात्। स्वलक्षणे यो विधिर्मित्रलक्षणविधिस्तस्य विरोधादन्ये पठिता न मित्रारातित्वे॥ तदुक्तं॥ होरामक
रंदे॥ स्वत्रिकोणभवनात्धनान्त्यधीधर्मरंध्रसुखतुंगमेश्वराः स्युर्निसर्गसुहृदोऽपरे रयः समेतदिह सत्यभावितं॥ १॥ किं च

धा

राम
६

अथ उक्तान्येव स्पष्टानुशार्दूलविक्रीडितेनाह॥ शत्रुमंद इति॥ रवेरिन्दुभौमजीवाः मित्राणि बुधः समः॥ शुक्रशनी रिपु॥

१॥ इंदो रविबुधौ मित्रे। कुजगुरुशुक्रमंदाः समाः रिपवो न संति। कुजस्येंदुरविजीवा मित्राणि॥ शुक्रशनी समौ॥ बुधो रिपुः॥ बु

धस्य रविशुक्रौ मित्रे॥ कुजगुरुसौराः समाः॥ चन्द्रो रिपुः॥ गुरो रविचन्द्रकुजाः मित्राणि। शनिः समः॥ बुधशुक्रौ रिपू॥ शुक्रस्य

बुधशनी मित्रे। कुजजीवौ समौ॥ रवीन्दू रिपू॥ शनेः शुक्रबुधौ मित्रे। गुरुः समः। रवीन्दुकुजा रिपवः॥ स्वत्रिकोणभवनादित्यादि

सारंजे ५

नाहः॥ अन्योन्येति॥ ग्रहाः परस्परं धनेत्यायेके

श्लोको ५

नाथे पूर्वं त्कालेऽमी विभज्य मयोक्ता॥ १७॥ तात्कालिकमित्रारिभावं शार्दूलेनाह॥ अन्योन्येति॥ ... स्थितोऽपि मित्रमिति केचित्॥ अन्योन्यश

र्मभ्रात्चतुर्थस्था तत्काले जन्मनियात्रायां विवाहे प्रश्ने वा मित्राणि स्युः॥ स्वस्वेष्टे स्थितोऽपि मित्रमिति केचित्॥

शत्रू मंद सितौ समश्च शशिजो मित्राणि शेषा रवेः तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः जी

वेंद्रूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॥ १६॥ सूरेः

सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी शुक्रज्ञौ

सुहृदौ समः सुरगुरुः सौरस्य चान्येऽरयो ये प्रोक्ताः सुहृदः त्रिकोणभवनात्तेमी मया कीर्तिताः॥ १७॥ १७॥

अन्योन्यस्य धनव्ययायसहजव्यापारबंधुस्थितास्तत्काले सुहृदः स्वतुंगभवनेप्येकेऽरयस्त्वाथा॥ द्येकानु

क्तभपान्सुहृत्समरिपून्संचिंत्य नैसर्गिकान्तत्काले तु पुनस्तु तानधिसुहृन्मित्रादिभिः कल्पयेत्॥ १९॥

...न्योन्यस्य ... तत्कालेऽन्यो रिपवः॥ द्येकेति॥ द्विभपान्एकभपान्अनुक्तभ

नवः स्युः॥ तद्यथा॥ एकराशिस्थसुतारिसप्ताष्टमधर्मस्थाः तत्कालेऽन्यो रिपवः॥ ... ज्ञात्वा जन्मादौ तान्वाधिसुहृदादिभिः कल्पयेत्॥

पान्पूर्वोक्तान्मित्रसमारीन्नैसर्गिकान् शत्रुमंदसितावित्यादिनोक्तान्ज्ञात्वा जन्मादौ ... निसर्गसुहृत्समः॥ समः शत्रुः शत्रु

तत्रस्वाभाविकं मित्रं धनारिस्थमधिमित्रं॥ रिपुः समः समो मित्रं॥ एवं पंचधा ... स्थितो निसर्गसुहृत्समः॥

बृ. हु०टी०
७

अथ ग्रहाणां स्थानदिग्बले द्वे धकेनाह॥ स्वोच्चेति॥ स्वोच्चे प्रत्येकं संध्यते॥ स्वोच्चे स्वमित्रगृहे स्वमूलत्रिकोणं च॥ बुधस्य कन्या क्षेत्रोच्च मूलत्रिकोण नि॥ गुरोर्धनुः क्षेत्रं मूलत्रिकोणं च॥ शुक्रस्य तुला क्षेत्रं मूलत्रिकोणं च॥ शनेः कुंभ क्षेत्रं मूलत्रिकोणं च॥ तत्र विशेषसारावल्यां॥ विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनकर्मस्य॥ उच्चं भागत्रितयं वृषइंदोः स्यात्त्रिकोणमपरेंशाः॥१॥ मेषे द्वादशभागास्त्रिकोणमपरे स्वतुंगभौमस्य॥ उच्चफलं कन्यायां बुधस्य तिथ्यंशकैः समं चिंत्यं परतस्त्रिकोणजालं पंचभिरंशैः स्वराशिजं परतः॥ दशभिर्भागैर्जीवस्य त्रिकोणफलं स्वभं परं चापे॥३॥ शुक्रस्यांशास्तिथयस्त्रिकोणमपरे धटे स्वराशिस्थं॥ कुंभे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंह इति॥४॥ दिग्बलमाह॥ दिक्ष्विति॥

स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्वगृहोपगतैश्च॥ दिक्षु बुधांगिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च॥१९॥ उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः॥ विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः॥२०॥

१४

बुधगुरू प्राच्यां लग्नस्थौ बलिनौ। रविकुजौ याम्यां दशमस्थौ॥ शनिः प्रतीच्यां सप्तमस्थः॥ सितेन्दू उदीच्यां सुखस्थौ विलग्नर्थः॥ योयत्र बली ततः सप्तमस्थो विबलः॥ मध्ये त्वनुपाततः फलं॥१९॥ अथ चेष्टाबलं द्वे धकेनाह॥ उदगयनेत्यति॥ रविचंद्रावुत्तरायणे बलिष्ठौ॥ कुजसितबुधगुरुसौराः वक्रगाश्चंद्रयुताश्च बलिनः॥ ग्रहाणां रवियोगोऽस्तमयः॥ चन्द्रयोगः समागमः॥ कुजादीनामन्योन्ययोगे युद्धं॥ तदुक्तं॥ दिवसकरेणास्तमयः समागमः शीतरश्मिना सहितानां॥ कुसुतादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानामिति॥ वीर्यस्तीर्णरश्मयो बलिनः॥ युद्धेऽन्योन्ययोगे उत्तरदिग्भागस्थो बली॥ शुक्रं विना॥ तदुक्तं॥ सर्वे जयिन उदक्स्था दक्षिणदिक्संस्थो जयी शुक्र इति॥२०॥ श्रीकृष्णाय नमः॥

राम
७

13

२४ श० । शनिः फु कुजः । बु बुधः । गुरुः । शु । शुक्रः चं । विधुः । र । सूर्यः एताः आख्याः अक्षरा एषां पठितः उन्नेयः

कालबलं नैसर्गिकबलं मालिन्याह ॥ निशीति ॥ चंद्रकुजशनयो रात्रौ बलिनः । बुधः सदा ॥ निशि दिने च बली । रविगुरुसिता दिने बलिनः ॥ क्रूराः कृष्णपक्षे । सौम्याः शुक्लपक्षे बलिनः ॥ स्ववर्षे स्वदिने स्वकाले स्वहोरायां स्वमासे च बलिनः ॥ २१ ॥ छ ॥

इति श्रीमहीधरकृते बृहज्जातकविवरणे ग्रहयोनिभेदाध्यायो द्वितीयः ॥ २ ॥ अथ वियोनिजन्माध्यायो व्याख्यायते ॥ तत्र तीर्यक्पक्षिस्थावरादीनां उत्पत्तिर्वियोनिजन्म तद्दर्शनं तिलकेनाह ॥ क्रूरग्रहैरिति ॥ चंद्रगतद्वादशांशराशितुल्यं वियोनिसत्वं वदेत् ॥ यदि च लग्नगतद्वादशांशो वियोनिसंज्ञः स्यात् ॥ नान्यथा ॥ तत्र मेषद्वादशांशराशिस्थे चंद्रे मेषसंज्ञं वियोनिजन्म ॥

निशि शशिकुजसौराः सर्वदाज्ञोऽन्हि चान्ये बहुलसितगतास्तु क्रूरसौम्याः क्रमेण । द्वयनदिवसहोरामासपैः कालवीर्यं शकुबुगुशुचराद्याः वृद्धितो वीर्यवंतः ॥ २४ ॥ इति बृहज्जातके ग्रहयोनिभेदाध्यायः ॥ २ ॥ छ ॥ क्रूरग्रहैः सुबलिभिर्विबलैश्च सौम्यैः क्लीबे चतुष्टयगते तदवेक्षणाद्वा ॥ चंद्रोपगद्विरसभागसमानरूपं सत्वं वदेत् यदि भवेत्स वियोनिजन्मा ॥ १ ॥ पापा बलिनः स्वभागगाः पारक्ये विबलाश्च शोभनाः ॥ लग्नं च वियोनिसंज्ञकं दृष्ट्वात्रो ॥

वृषस्थे चंद्रे वृषाश्वाममहिषादेः ॥ कर्कस्थे कुलीरादेः ॥ सिंहस्थे द्वीपिशृगालमार्ज्जारादेः ॥ वृश्चिकस्थे सर्पकीटादेः ॥ धनुर्द्वादशांशोत्तरार्द्धस्थे अश्वखरादेः ॥ मकरपूर्वार्द्धस्थे मृगस्य ॥ मृगोत्तरार्द्धे मिंडूकादेः जलजंतोः ॥ मीने द्वादशांशराशिस्थे चन्द्रे मत्स्यजन्मः ॥ परं तु ॥ क्रूरैर्बलिष्ठैः ॥ सौम्यैः खलैः ॥ बुधशनी वा केंद्रगौ ॥ एको वियोनिजन्मयोगः ॥ तदवेक्षणाद्वेति ॥ शनिबुधदृष्टे चन्द्रे वियोनिद्वादशांशराशिस्थे बलीषु क्रूरेषु अबलेषु सौम्येषु संस्थिति योयोगः ॥ २ ॥ तदुक्तं सारावल्यां ॥ क्रूरैः स्वबलसमेतैर्विबलैः सौम्यैर्वियोनिभागगते चन्द्रे । ज्ञशनीकेन्द्रगतौ क्षितिवा इयेवियोनि स्यादिति ॥ योगांतरं वैतालिकेनाह ॥ पापा बलिनः स्वनवांशस्थाश्च सौम्याः निर्बलाः परनवांशस्थाश्च ॥ लग्नं च वियोनिः तदापि चंद्रगतद्वादशांशतुल्यं वियोनिं वदेत् ॥ २ ॥ श्री ॥

निर्बले:

रम

पापबलिर

14

बृ०ह०टी०
८

वियोनिजन्मान्यकुसुपजातमाह॥ क्रियइति॥ मेषः १ पशूनां शिरः॥ वृषो २ मुखकंठौ। मिथुनो पूर्वपादस्कंधौ॥ कर्कः पृ-
ष्ठं। सिंहो ५ वक्षः॥ कन्या पार्श्वद्वयं। कोष्ठस्य उदरं। तुला कुक्षिद्वयं। अलिर्गुदः॥ धनुः पश्चिमपादौ। मकरो लिंगः व षणौ
। स्फिक् कुंभो उर्द्धकुंभः॥ मीनः पुच्छं॥ चतुष्पदादीनां उपलक्षणं॥ तत्र पूर्वपदस्थाने पक्षपाली शेषं तुल्यं॥ प्रयोजनं॥
राश्युपलक्षिते गेवर्णादिज्ञानं॥३॥ वियोनिजन्मस्थाने वेष्चरेस्माह॥ लग्नांशकादिति॥ वियोनिजन्म निज्ञाते बलयु
क्तात्लग्ननवांशाद्वर्णान्वदेत्॥ यदि स्वामिनायुतस्य दृष्टस्य वा राशेनवांशो लग्नतः स्यात्तदा त दाशिव राशिस्थितादिकं व
देदित्यर्थः॥ हतनवांशादयपि॥ यद्वा लग्नगोयोग्रहस्तद्वर्णतामादिकं वदेतिसर्थः॥ हतनवाशावपि॥ यद्वा लग्नगोत

क्रियः शिरोवक्त्रगले वृषोन्ये पादांशके पृष्ठमुरोथपार्श्वे कुक्षिस्त्वपानो घ्राय मेढ्रमुष्कौ स्फिक्पुच्छमित्याहुच
तुष्पदांगे॥३॥ लग्नांशकात्ग्रहयोगेक्षणाद्वा वर्णान्वदेद्बलयुक्ताद्वियोनौ॥ दृष्ट्या समानुवदेच्च संख्यया **ना**
रेखां वदेत्स्मरसंस्थेथ पृष्ठे॥४॥ खगेदृक्काणे बलसंयुते न चाग्रहेणयुक्ते चर भांशको दये॥ बुधांशके वा
विहगास्थलांबुजाः शनीश्वरेंदीक्षणयोगसंभवाः॥५॥

दृशावे योग्रहो लग्नमीक्षते। तद्वर्णं वदेत्॥ योगदृष्ट्याभावे लग्ननवांशराशेर्वर्णं। बहुभिर्युतं दृष्टं वा लग्नं तदा बहून्वर्णान्वदेत्। व
लवत्तो वर्णबाहुल्यं। अपयोयावांगेषु वैक्तेगतः। तत्र तद्वर्णं वदेत्। लग्नात्सप्तमस्थे ग्रहे पृष्ठे तद्वर्णं रेखां वदेत्॥४॥ पक्षीजन्मव
संततिलके माह॥ खगेति॥ सिंहकुंभयोः प्रथमो मिथुनतुलयोर्द्वितीय श्चेति खगद्रेष्काणः॥ एषां मध्ये द्रेष्काणो लग्नगे बल
युक्ते नकेचिद्युते शनिनायुते दृष्टे वा स्थलजपक्षीणां जन्म॥ चंद्रेणायुते दृष्टे वा जलपक्षिणां जन्म इत्येको योगः॥ चरनवांशोदये
बलिनाग्रहेणयुक्ते शनिचंद्राभ्यां युते दृष्टे वा क्रमात्स्थलजलजानां जन्मेति द्वितीयो योगः॥ वा बुधनवांशकोदये बलवत्खगयुक्ते

15

शनियुतेदृष्टे वा स्थलजानां जन्म। चन्द्रयुतदृष्टे वा जलजानामिति तृतीयः॥ तदुक्तं। विहंगो द्रिकाणे ग्रहेणाबलिनायुते ऽथ चरभां
शे वीर्ये। शेवा विहगाः स्थलांबुजाः शनिशशीक्षणयोगादिति॥५॥ वृक्षजन्म वसंततिलके नाह॥ होरेति॥ लग्नचन्द्रगुरुसू
र्यबलहीने तरूणां जन्म प्रष्टतीति वाच्यं। तत्र जलस्थलजवृक्षभेदो शाकतो बोध्य॥ कर्कमीनमकरोत्तरार्धं जलचराः त
द्राश्यंशोदये जलवृक्षाः। अन्यराश्यंशोदये स्थलवृक्षाः॥ तत्र संख्यामाह॥ लग्नादिति। उदितांशपतिर्लग्नात् यावत्संख्ये राशौ त
त्संख्याः वृक्षाः स्थलजाः जलजा वा वाच्याः॥ अत्रांशपतिर्वशाद्यायुर्वोदिवद्धिगुणादिकं वाच्यं॥ स्वतुंगवक्रोपगते त्रिसंगु

होरेंदुसूरिरविभिर्विबले तरूणां तोये स्थले तरुभवोंशकृतप्रभेदः॥ लग्नात् ग्रहः स्थलजलर्क्षपतिस्तु यावान् तावं
तएव तरवः स्थलतोयजाताः॥६॥ अंतःसारान् जनयति रविर्दुर्भगान् सूर्यसूनुः क्षीरोपेतांस्तुहिनकिरणः कंटकाढ्यां
रु श्च भौमः॥ वागीशज्ञौ सफलविफलान्पुष्पवृक्षांश्च शुक्रः स्निग्धानिंदुः कटुकविटपान्भूमिपुत्रश्च भूयः॥७॥ शुभोऽशु
भर्क्षे रुचिरं कुभूमिजं करोति वृक्षं विपरीतमन्यथा॥ परांशके यावति विच्युतः स्वकात् भवंति तुल्यास्तरवस्तथावि
धाः॥८॥ इति वृहज्जातके वियोनिजन्माध्यायः॥३॥

णामित्यादि॥६॥ स्थलजलांशपतिवशात्तरूणां विशेषज्ञानं मंदाक्रांतयाह॥ अंतरिति॥ रविरंशपतिस्तरूणां मध्ये दृढसारान् यति
। शनैर्दुर्भगान् कुदर्शनादीन्। चंद्रः क्षीरतरून् पिप्पलादीन्। कुजः कंटकयुतान् बदर्यादीन्। गुरुः शुभफलानाम्रादीन्। बुधो विफला
---दीन्। शुक्रः पुष्पिततरूः जाति चंपकादीन्॥ चंद्रः पुनः स्निग्धान् क्षीरकाहीन्। कुजः पुनः कटुकपचाच। भल्लातकादीन्॥७॥ भूत
रु शुभाशुभज्ञानं वसंततिलके नाह॥ शुभ इति॥ सरव जलजलजांशपतिः शुभः सन् तदा क्रूरराशौ स्थितश्चेत्तदा रुचिरं तरुं कुभूमि
तरुं मिजातं करोति॥ अन्यथा॥ अंशपतिरशुभः तत्कालीसौक्रूरश्चेत्तदा अशुभं तरुं शुभभूमिजं वदेत्॥ अर्थादेव शुभे शुभराशौ स्थि

बृ०ह०टी०
९

शुभंतरुं शुभमिजं॥ अशुभे अभराशौ स्थेअशुसुभंतरुं अशुभमभिजंवदेत्॥ किंच॥ सस्थलज्ञांशपतिः स्वांदंशाघावत्संख्येपरनवांश गतस्तावत्संख्यास्तरूलज्ज्ञातियास्तरवोभवंति॥ ८॥ छ॥ इति श्रीमहीधरकृते बृहज्जातक विवरणे वियोनिजन्माध्यायस्तृतीयः३॥ अथनिषेकाध्यायो व्याख्यायते॥ तत्र आदौ गर्भाधानमिति॥ ऋतुनिरूपनम्॥ तत्र स्त्रीनरसंयोगज्ञानं वसंतस्थेनाह॥ कुजेति॥ चन्द्रे पीडर्क्षे अनुपचयराशिगते सति नारीणां प्रतिमासं रजोदर्शनं कुजेन्दुहेतुपश्येद्दृशं गर्भयोग्यं भवति॥ अयमर्थः॥ नार्याजन्मराशेरुप चपस्थे चन्द्रे कुजदृष्टे गर्भाधानयोग्यं रजःस्यात्॥ अन्यत्र वाला तुरा वृद्धाभ्य इति ज्ञेयम्॥ तदुक्तं। स्त्रीणां गतोऽनुपचयर्क्षमनुस रश्मिः संदृश्यते यदि धरात्तनयेन तासां॥ गर्भग्रहार्थवमुशंतितदानवंध्या वध्यातुरा ल्पवयसामपि चैतदिष्टमिति॥ कुजाऽदृष्टेउप

कुजेंदुहेतुः प्रतिमासमार्त्तवं गते तु पीडर्क्षमनुष्णदीधितौ॥ अतोऽन्यथास्थे शुभपुंग्रहेक्षिते नरेणसंयोगमुपैति कामिनी॥१॥ यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः॥ असद्ग्रहालोकितसंयुते स्ते सरोषइष्टैः सवि लासहासः॥२॥

चयस्थे चंद्रं रजोविफलमित्यर्थः इव॥ १॥ अथपुंयोगमाह॥ अतइति॥ उक्ताद्विपरीते चन्द्रे अयमर्थः॥ नरजन्मराशेरुपचयस्थे च न्द्रे शुभपुंग्रहेण गुरुणा दृष्टे नारी नरेणमिथुनं जातीतिवाच्यम्॥ एतच्चरितु विरमे च तुर्थादौ दिने वोध्यं॥ तदुक्तं॥ पुरुषस्योप चयस्थो गुरुणा यदि दृश्यते हिमममयूखः स्त्रीपुरुषसंप्रयोजनं गंतव्यावदेत्॥ अन्यथा नैवमिति॥ तथा च ऋतुविरमे स्नातायांप घुपचयस्थ श्चंद्रः पुंसां च लिनागुरुणा दृष्टो भवतीसंगमस्तरे ति॥ १॥ अथमैथुनप्रकारं वक्तुमाह॥ यथेति॥ आधानलग्नात्स प्तमलग्नभावः सप्तमो राशिस्तत्संज्ञो जंतुर्येन प्रकारेण मैथुनं करोति तथा नरमिथुनस्य संभोगो वाच्यः॥ तस्मिन्समये पापैर्दृष्टे युते वा सकलहं रतं। सौम्यैर्दृष्टयुते वा सविलासहासं रतं। केनापि युतदृष्ट्याभावेन सरुणसंनापिकलहं॥ २॥ श्रीकृष्णाय नमः

राम
९

17

गर्भसंभवं शास्त्येनाम ॥ रविविति ॥ आधानकाले पत्रतत्रस्थैः रवीन्दुशुक्रकुजैः स्वनवांशस्थैर्वा संगर्भसंभवः ॥ यद्वा ॥ उपचयर्क्षे
गाभ्यां सबलाभ्यां सूर्यसिताभ्यां स्वनवांशगाभ्यां गर्भः ॥ अथवा नाथ्युपचयर्क्षगाभ्यां कुजचंद्राभ्यां गर्भः ॥ तद्वर्क्षे ॥ बलयुक्तौ स्वगृहांशो
पर्क्षे सितार्का उपचयर्क्षे गौ पुंसां स्त्रीणां वा कुजचन्द्रौ यदा संभवति गर्भ इति ॥ १ द्वितीयो योगमाह ॥ गुराविति ॥ नवपंचमलग्नात्सप्तमस्थे गुरौ
अवस्यमपत्यो भवत्। क्लीबानामेते योगा निष्फलाश्च स्वकराः अंधानामिव ॥ २॥ आधानकालेशः स्वशावावधि स्त्रीनरयोः शुभाशुभं वंश
स्येनाह ॥ दिवाकरेति ॥ रवेः सप्तमस्थौ कुजशनी स्वमासे पुंसो रोगप्रदौ ॥ चंद्रात्सप्तमस्थौ कुजशनी नार्या रोगप्रदौ ॥ सूर्यात्कुजशन्यो

र्वीन्दुशुक्रावनिजैः स्वभागगैः गुरौ त्रिकोणोदयसंस्थिते पि वा ॥ भवत्यपत्यं हि विबीजिनामिमे कराहिमांशोर्विदृशामिवाफ
लाः ॥ ३॥ दिवाकरेंद्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा ॥ व्ययस्वगौ मृत्युकरौ युतौ तदा तदेकदृष्ट्याभर
णायकल्पितौ ॥ ४॥ दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनैश्चरेंदू निशि तद्विपर्ययात् ॥ पितृव्यमातृष्वसृसंज्ञितौ चतौ तथो
जयुग्मर्क्षगतौ तयोः शुभौ ॥ ५॥
रे कोऽद्वितीयेऽन्योन्यदृशश्चेत्तदातयोर्योर्वलीतन्मासे पुंसो मृति प्रदौ ॥ चंद्रादेवं नार्या मृति प्रदौ ॥ पुनीत्व येति ॥ कुजशन्योर्मध्ये एकेनरविर्युतो
ऽपरेणादृष्टस्तदापि पुंसो मृतिः ॥ एवं चंद्रोपद्येके नयुतोऽन्येन दृष्टस्तदा नार्या मृतिर्द्वयोर्बलिनो मासे ॥ ४॥ पितृपितृव्यमातृमातृष्वसृणां शु
भाशुभं वक्तुं शास्येनाह ॥ द्विवेति ॥ दिने निर्विकस्य जातस्य वारविः पिता शुक्रो माता । रात्रौ शनिः पिता चंद्रो माता । रात्रौ जातस्यार्कः पितृव्यः
शुक्रो मातृष्वसा मौसि । दिनेश निः पितृव्यः ककाः चंद्रो मातृष्वसा ॥ प्रयोजनमाह ॥ ओजेति ॥ दिवा विषमराशीस्थो रविः शुभः पितुः ॥ नि
शि पितृव्यस्य । दिवा शुक्रः समराशीस्थो मातुः शुभः । रात्रौ मातृष्वसुः । शनी रात्रौ विषमगः पितुः शुभः ॥ दिवा पितृव्यस्य । चंद्रो रात्रौ समगो
मातुः शुभः । दिवा मातृष्वसुः । अर्थादेवोक्त वैपरीत्ये तेषामशुभः दिवा पितृव्यस्य । यथा दिवा समगोऽर्कः पितुरशुभः । रात्रौ पितृव्यस्य । दिवा विष

बृ॰ टी॰
१०

मगः शुक्रो मातुरशुभो रात्रौ मातृस्वसुः। रात्रौ समगः शनिः पितुरशुभः। दिवा पितृव्यस्य। रात्रौ वि समगश्चंद्रो मातुरशुभः। दिने मातृष्व
सुरिति॥५॥ मातुर्मृतियोगद्वयं कृतपदेनाह॥ अभिलषद्भिरिति॥ पापैर्मध्यस्थे लग्ने शुभैरदृष्टे गर्भिणी म्रियते॥ तदुक्तं। असुभैर्द्वाद
शार्कस्थैः॥ शुभदृष्टिविवर्जिते। आधानलग्ने मरणं योषितः प्रवदेद्बुधः इति॥ योगान्तरमाह॥ उदयेति॥ शनौ लग्नस्थे क्षीणेंदुकुजद
ष्टे गर्भिणी स्त्री म्रियते॥६॥ योगांतरं वैतालिकेनाह॥ पापेति॥ लग्नचंद्रौ युगपद्वर्त्तमानौ पापद्वयांतस्थौ सौम्यादृष्टौ न चेत्स्यपक
स्थितौ वा एवं तदा गर्भिणी। योगकर्त्तरणं बलिनो मासे म्रियते॥७॥ मातुर्मृतिं वैतालिकेनाह॥ क्रूरेति॥ चन्द्राच्चतुर्थगे क्रूरे कुजेऽस्त

अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेति शुभदृष्टिमयाते। उदयराशिसहिते च यमे स्त्री विगलितोडुपतिभूसुतदृष्टे॥६॥
पापद्वयमध्यसंस्थितौ लग्नेंदू न च सौम्यवीक्षितौ॥ युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते॥७॥ क्रूरैः शशिनश्च
चतुर्थगैः लग्नाद्वा निधनाश्रिते कुजे॥ बंध्वंत्यगयोः कुजार्कयोः क्षीणे हिमगौ निधनाय पूर्ववत्॥८॥ उदयास्तगयोः कुजा
र्कयोः निधनं शस्त्रकृतं वदेत्तदा॥ मासाधिपतौ निपीडिते तत्काले स्रवणं समादिशेत्॥९॥ शशांकलग्नोपगतैः शु
भग्रहैः त्रिकोणजायार्थसुखास्पदस्थितैः॥ तृतीयलाभर्क्षगतैश्च पापकैः सुखी स गर्भो रविणा निरीक्षितः॥१०॥

मे च द्वितीयः॥ लग्नाच्चतुर्थगे कुजे द्वादशस्थे पवततत्स्थे क्षीणचन्द्रे तृतीयः। आधानलग्ने एषामन्यतमे योगे गर्भिणी स्त्री म्रियते
॥८॥ अथ शस्त्रमृतिं गर्भस्रावं च वैतालिकेनाह॥ उदयेति॥ लग्ने कुजे सप्तमेऽर्के नार्या गर्भिण्याः शस्त्रेण मृतिः। कलहे सादि
नामासे सौम्येऽस्पृति। निषेककाले ये मासेशः स्मेनजितः केतुः पश्चक्ष्मापाभिहतो वा तन्मासे गर्भस्रावः॥९॥ गर्भपुष्टिं वंशस्थेनाह॥ श
शांकेति॥ लग्नस्थैः सौम्यैश्चन्द्रगैर्वा भयगैर्वा नवपंचमसप्तमद्वितीयचतुर्थदशमस्थैर्वा चंद्राच्च्याद्वाभ्यांऽरते सुस्थितैः सौम्यैस्तृती

मेघ

निषेक जन्मप्रश्नान्यतम कालात् पुंस्त्रीज्ञानं शार्दूलविक्रीडितेनाह ॥ ओजर्क्ष इति ॥ लग्नार्कगुरुचन्द्रेषु विषमराशिगेषु विषमराशिनवांशस्थेषु च बलवत्सु पुंजन्म ॥ लग्नादिषु समराशिगेषु तन्नवांशस्थेषु स्त्रीजन्म ॥ गुरुसूर्यौ विषमराशिगौ वलिनौ पुंजन्म प्रदौ । प्रुशिशुक्रौ कुजाः समराशिगताः बलिनः स्त्रीजन्मदाः ॥ नात्र नवांशनियमः ॥ एते हि स्वभावस्यावधेक्षिताः स्वपक्षे भ्रमं कुर्वन्ति ॥ अयमर्थः ॥ मिथुनकन्याधनुर्मीनाद्विस्वभावाः तत्र मिथुनधन्विनौ नरौ कन्यामीनौ स्त्रियौ ॥ मिथुनधनुरंशगो जीवार्कौ बुधदृष्टौ पुंसद्धपं कुरुतः । कन्यामीनांशगा श्च न्द्रशुक्रकुजाः बुधदृष्टाः स्त्रीद्वयं ॥ उभयोर्मिश्रत्वे कन्यानरश्च ॥ ११ ॥ पुंजन्मयोगांतरमुपजा

१

ओजर्क्षेपुरुषांशकेषु बलिभिः लग्नार्कगुर्विन्दुभिः पुंजन्म प्रदेत्समांशकगतेर्युग्मेषु तैर्योषितः ॥ गुर्वर्कौ विषमेनरं शशिसितौ वक्रश्च युग्मे स्त्रियं द्व्यंगस्था बुधवीक्षणाच्च यमलं कुर्वन्ति पक्षे स्वके ॥ ११ ॥ विहायलग्नं विषमर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात् ॥ प्रोक्तग्रहाणामधिगम्य वीर्यं वाच्यः प्रसूतौ पुरुषांगना वा ॥ १२ ॥ अन्योन्यं यदि पश्यतः शशिरवी

ग्या वपि

यद्यार्किसौम्यौ तथा वक्रो वा समगं दिनेशम समे चं द्रोदयौ चेत् स्थितौ ॥ युग्मौजर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ पुंभागे सितलग्नशीतकिरणाः षट् क्लीबयोगाः स्मृताः ॥ १३ ॥

ल्याह ॥ विहायेति ॥ आधान लग्नं प्रश्नलग्नं वा तत्काल शनिर्लग्नाद्विषमे तृतीयपंचमादौ गतः पुंजन्मप्रदः योगकर्तृणां ग्रहाणां बलं विचार्य प्रशवे नरो गनावा वाच्या ॥ १२ ॥ क्लीबयोगान् शार्दूलविक्रीडितेनाह ॥ अन्योन्यमिति ॥ चन्द्रार्कौ क्रमात्सम विषमगौ अन्योन्यं यदि पश्यतः सम राशिस्थश्चन्द्रो विषमराशिगं रविं पश्यति अर्कश्चन्द्रमित्यर्थः ॥ तदेकः क्लीबयोगः १ शनिबुधावपि यथाक्रमं समविषम राशिगौ अन्योन्यं पश्यतस्तदा द्वितीयः २ विषमगो भौमः समराशिगमर्कं पश्यति रविश्च कुजं तदा तृतीयः ३ लग्नचन्द्रौ मविषमर्क्षगतौ यदा अन्योन्यं पश्यतस्तदा चतुर्थः ४ इंदुबुधौ यथाक्रमं समविषमगौ यत्र तत्र स्थेन कुजेन दृष्टौ तदा पंचमः ५ शुक्रलग्नचन्द्राः विषमराशिगौ समगे कुजेन दृष्टौ तदा चतुः ४

बृ॰टी॰
२१

द्विस्त्री गर्भ योगान् एवाह् लविकी डितेनाह॥ युग्मइति॥ यदा च न्द्राशुक्रौ समराशिगौ बुधकुजगुरुलग्नानि विषमगानि स्त तदा गर्भे स्त्री पुंसो १ यदा चंद्रलग्ने यो ओजराशिगौ तदापि मिथुनं २ यदा बुधकुजगुरुलग्नानि समगानि बलवंति च तदापि मिथुनं ३ यदा लग्नांशस्थो बुधो द्विस्वभावांशान् अन्यग्रहगतान् लग्नगतं च यंगांशं पश्यति तदा त्रयं वाच्यं। तत्र बुधांशवशात् द्वंद्वं वाच्यं॥ अयमर्थः। मिथुनांशस्थो बुधो ग्रहलग्नगान् अन्यगं शान् पश्यति तदा पुंसद्वयं कन्यैका। कन्यानवांशस्थो बुधस्तान् पश्यति तदा कन्याद्वयं पुत्र एकः॥ अमिश्रैः सममिति॥ ग्रहलग्नबुधैरमिश्रैः समलिंगस्थैः समलिंगत्रयं वाच्यं॥ अयमर्थः। मिथुननवांशस्थो बुधो मिथुनधनुरंशगान् ग्रहोदयान् पश्यति तदा गर्भे पुंत्रयं॥ यदा कन्यानवांशस्थो बुधः कन्यामीनांशस्थान् ग्रहोदयान् पश्यति तदा कन्यात्रयं वाच्यं।१३ किंच

युग्मे चंद्रसितौ तथौजभवने स्युर्ज्ञारजीवोदयाः लग्नेन्दू नृनिरीक्षितौ च समगौ युग्मेषु वा प्राणिनः॥ कुर्युस्ते मिथुनं ग्रहो

२४

दयगता द्व्यंगांशकान्पश्यति स्वांशे त्रितयं ज्ञगांशकवशाद्युग्मं त्वमिश्रैः समं॥१४॥ धनुर्धरस्यांत्यगते विलग्ने ग्रहैस्तदंशोपगतैर्बलिष्ठैः॥ ज्ञेनार्किणा वीर्ययुतेन दृष्टे संति प्रभूतान्यपि कोशसंस्थाः॥ १५॥

सारात्म्यं॥ समराशौ सितशशिनौ विषमे गुरुवक्रसौम्याल ग्नेषु। योगेऽस्मिन् गर्भाधाने सद्भिर्मिथुनं प्रवक्तव्यम्॥१॥ लग्नेन्दुवा समगौ पुंग्रहदृष्टौ मिथुनजन्मकरौ॥ उदयज्ञवक्रगुरवो बलिनः समराशिगास्तथैवोक्ताः॥२॥ द्विशरीरांशकयुक्तान् ग्रहान् विलग्ने च पश्यतीन्दुसुतः॥ कन्यांशे द्वि कन्ये पुरुषश्च निगद्यते गर्भे।३ मिथुनांशे कन्यैका द्वौ पुरुषौ मिथुनमेवं स्यात्। मिथुनधनुरंशगतान् ग्रहान् विलग्नं च पश्यतीन्दुसुतः ४ मिथुनांशस्थश्च यदा पुरुषत्रितयं तदा गर्भे॥ कन्यामीनांशकस्थान् विलग्नादुदयं च पुवति भागगतान्। यदा पश्यति शीतगुत्तनयः कन्यात्रितयं तदा गर्भे इति॥१४॥ बहुसंभवमुपजात्याह॥ धनुरिति॥ धनुर्लग्ने स्वनवांशास्थे सर्वे ग्रहे धनुरंशगेषु बलवत्सु चलग्ने बलिनाबुधे

गर्भमासेशान्कुकुटेनाह॥ कलल्वेति॥ सिंताघाः प्रथमादिमासेषु कललादीनि कुर्वंति। तत्राधिपा ज्ञेयाः। अथमर्थः। गर्भस्य प्रथममासेक
ललं शुक्रशोणितमिश्रत्वं। तत्र शुक्रोधिपतिः॥१॥ द्वितीये काठिन्यं कुजोधिपतिः॥२॥ तृतीये हस्ताद्यवयवोत्पत्तिः। गुरुः स्वामी॥३॥ चतुर्थे स्थु
त्पत्तिः रविस्वामी॥४॥ पंचमे चर्मोत्पत्तिश्चन्द्रोधिपः॥५॥ षष्ठे रोमोत्पत्तिः शनिरधिपः॥६॥ सप्तमे चैतन्यं बुधोधिपः॥७॥ अष्टमे माताभक्षितस्यान्नस्वा
द्वारेणाशनं। तत्र गर्भाधानलग्नेशोधिपः॥८॥ नवमे उद्वेगश्चन्द्रोधिपः॥९॥ दशमे प्रसवः सूर्योधिपः॥११॥ मासेशास्तु स्वांगभे शुभाशुभं। आ
धानलग्नेपीडिते ग्रहे तन्मासे गर्भपातः। मन्दस्तोतन्मासि गर्भपीडा। निर्मले ग्रहे तन्मासि गर्भपुष्टिः। तदुक्तं॥ कलुषैः पीडा पतनं निपी

कललघनांकुरास्थिचर्मांगजचेतनताः सितकुजजीवसूर्यचंद्रार्किबुधाः परतः॥ उदयपचंद्रसूर्यनाथाः क्रमशो गदिता
भवंति शुभाशुभं च मासाधिपतेः सदृशं॥१६॥ त्रिकोणगे ज्ञे विबले स्तथापरैर्मुखांघ्रिहस्तैर्द्विगुणस्तथा भवेत्॥ अवा
क् गैवीहाव शुभैर्भसंधिगैः शुभेक्षितश्चेत्कुरुते गिरं चिरात्॥१७॥ सौम्यर्क्षांशे रविज रुधिरौ चेत्सदंतोत्र जातः कुब्जः
स्वर्क्षे शशिनि तनुगे मंदमाहेयदृष्टे॥ पंगुर्मीनेयमशशीकुजैर्वीक्षिते लग्नसंस्थे संधौ पापैः शशिनि च जडः स्यान्न चे

डितैर्निर्मलैः पुष्टिरिति॥ १८॥ अथ अधिकोनांगयोगं अवाच वंशस्थेनाह॥ त्रिकोणेशा इति॥ बुधे लग्नान्नवपंचमस्थे बुधान्यग्रहैः स्वव
ले षुद्विशीराश्च तुष्पदाश्च तुर्भुजास्तु॥ वृषस्थे चन्द्रे पापैः कर्कालिमीनन नवमनवांशस्थे मूकः स्यात्॥ एवं विधेपि चन्द्रे शुभदृष्टे चि
राद्वाचं कुरुते॥ अर्थात्पापदृष्टे मूकः स्यात्। मिश्रदृष्टे बलिनः फलं॥१७॥ अथ सदंतकुब्जजडपंगुजन्मयोगान्मंदाक्रांतयाह॥ सौम्य
ति॥ यदा शनिकुजौ कन्यामिथुनगतौ तन्नवांशगतौ वा तदा सदंतो जायते॥ कर्कलग्नस्थे चन्द्रे शनिकुजदृष्टे कुब्जः। मीनलग्ने शनिचन्द्रकुजै
र्दृष्टे पादहीनः। रविकुजशनिनामन्यतमे चन्द्रे च कर्कालिमीनांसनवांशगे शोत्रहीनः। परायोगकर्तारो ग्रहाः सौम्यैरदृष्टास्तदा योगचतुष्कं फलं वा

अथवामहीनांगयोगौ द्रेष्कैनाह॥ सौरेति॥ नवमनवांशस्थे मकरलग्ने शनिचन्द्राकैर्दृष्टे वामनः स्यात्॥ द्वितीयद्रेष्काणस्थे लग्ने कुजयुते शनिचन्द्रार्कदृष्टे भुजहीनः॥ तृतीयद्रेष्काणस्थे लग्ने कुजयुते शन्यादिदृष्टे पादहीनः॥ प्रथमद्रेष्काणस्थे लग्ने कुजयुते शन्यादिदृष्टे शिरोहीनः स्यात्॥ किंचित्सौरादिदृष्टि नानुवर्त्तयन्ति॥ तन्न अनुवर्त्तनं साधु॥ तदुक्तं॥ लग्ने द्रेष्काणगे भौमः सौरसूर्येन्दुवीक्षितः कुर्याद्दशिरसंतद्वत्सं चमेवाङ्गवर्जितं॥ विपादं नवमे स्थाने दृसौम्यैर्नवीक्षितइति॥ १९॥ नेत्रवैकल्यं हरिसपाह॥ नेत्रेति॥ चन्द्रार्कयुते सिंहलग्ने कुजशनिदृष्टे गर्भस्थोन्धोवाच्यः॥ अर्थादेव सिंहलग्नेऽर्कयुते शनिकुजदृष्टे दक्षिणाक्षकाणः॥ सिंहलग्ने चंद्रयुते शनि

सौरशशांकदिवाकरदृष्टे वामनको मकरांत्यविलग्ने॥ धीनवमोदयगेश्च द्रेष्काणैः पापयुतैरभुजांघ्रिशिरः स्यात्॥ १९॥
रविशशियुते सिंहलग्ने कुजार्किनिरीक्षितेनयनरहितः सौम्यासौम्यैः सबुद्बुदलोचनः॥ व्ययगृहगतश्चन्द्रो वामेहिन
स्त्वपरं रविस्त्वशुभगदितायोगायाप्या भवंतिशुभेक्षिताः॥ २०॥ तत्कालमिंदुसहितो द्विरसांशको यस्तत्तुल्यराशि
सहिते पुरतः शशांके या वानुदेति दिनरात्रिसमानभागस्तावत्तेह्नि निशोः प्रवदंति जन्म॥ २१॥

कुजदृष्टे वामाक्षकाणः॥ सिंहलग्नेऽर्कचन्द्रयुते शुभपापैर्दृष्टे बुद्बुदाक्षः॥ अत्राप्येकतमेन युक्ते प्राग्वत्॥ आधानलग्नाज्जन्मलग्ना
द्वा द्वादशगश्चंद्रो वामनेत्रं हंति। द्वादशगो रविर्दक्षिणनेत्रं हंति॥ त्रिकोणगे द्वादशयोगाः शुभदृष्टापापाः सुः पूर्णं फलं न प्रयच्छति
। किंचित्फलप्रदत्वर्थं॥ २०॥ अथाधानकालात्प्रसवकालज्ञानं वसंततिलकेनाह॥ तत्कालमिति॥ आधानलग्ने प्रसवकाले वा यत्र
राशौ यत्संख्ये द्वादशांशे चन्द्रस्तत्तुल्यस्तत्संख्यो मेषादिगणनया राशिस्तस्थे चन्द्रे पुरतो दशमे मासि गर्भस्य प्रसवो वाच्यः॥ तदुक्तं
सारावल्यां॥ पश्चिन्द्वादशभागे गर्भाधाने व्यवस्थितश्चन्द्रः॥ तत्तुल्ये प्रसवं गर्भस्य समादिशेत्प्राज्ञः॥ अन्ये त्वेवं वदंति॥ आधानकाले यत्रां
शो यावत्संख्ये द्वादशांशे चन्द्रस्तस्मात्तावत्संख्यो यो राशिस्तत्रस्थे चंद्रे दशमे मासि प्रसवः॥ तदुक्तं गार्ग्येण॥ यावत्संख्ये द्वादशांशे शशी तस्मिंश्चैव

स्थिताः नसंख्ये स्तुगेनाधीज्ञेसहैसहोवदेहिता॥२१॥

तत्र दिनरात्रिसंज्ञा न माह ॥ या वा निति ॥ गोजाश्वि कर्कमिथुनाः स्वाहिना दिनरात्रिलग्ना सुक्तानि तत्राधाने प्रसवे वा लग्नस्य यो नवांशो दिनसंज्ञो वा रात्रिसंज्ञो वा यावान् गतस्तावति दिननिशोः काले गते जन्म भवति वाच्यं ॥ लङ्कोक्तकालं दिवसनिशासंज्ञः समुद्रेतिर शिभागोपगम्या वा उदयस्तावान्तश्चोदि वशस्य रात्रौ वेति ॥ २० ॥ अथ चिरप्रतीमालिन्याह ॥ उदयतीति ॥ निषेककाले मकर कुंभान्यतर नवांशे उदयति सति शनौ चे सप्तमस्थे वर्षत्रयेण प्रसूतिर्वाच्या ॥ एवं विधिर्यदि चन्द्रे तदा द्वादशे वर्षे प्रसूति ॥ अपमर्थः ॥ आधानलग्ने यदि कर्कांशः सप्तमस्थश्चन्द्रः तदा द्वादशे वर्षे प्रसूतिः निगदितेति ॥ इह निषेकाध्याये आधानका

उदयति मृदुभांशे सप्तमस्थे पि मंदे यदि भवति निषेकः सूतिरब्दत्रयेण ॥ शशिनि तु विधिरेषा द्वादशाब्दे प्रकुर्यान्निगदित मिह चिंत्यं सूतिकालेपि युक्त्या ॥ २२ ॥ छ ॥ इति वराहमिहिरकृतो बृहज्जातके निषेकाध्यायश्चतुर्थः ॥ ४ ॥ पितुर्जातःप रोक्षस्य लग्नमिंदावपश्यति ॥ विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे ॥ १ ॥ उदयस्थेपि वा मंदे कुजे वास्तं समागते ॥ स्थिते वांतः क्षपानाथे शशांकसुतशुक्रयोः ॥ २ ॥

तत्र वशाद्यथा विधानं जन्मोक्तं पितृमातृादीनां शुभाशुभं च तज्जन्मलग्नाभ्यां [illegible] ॥ गर्भश्रवादिपूर्वकालादि चयथाधानजन्मलग्नाभ्यां तथा प्रश्नादपि वाच्यमेतदुक्तं ॥ जन्माधाने प्रश्नकाले वा ॥ २२ ॥ ॥ इति श्रीमहीधरकृते बृहज्जातकविवरणे निषेकाध्यायचतुर्थः ॥ अथ सूतिकाध्यायः तत्र पितुः परोक्षं जन्माह ॥ पितुरिति ॥ चन्द्रे यद्यपि लग्नमपश्यति पितुरसंनिधाने बालो जातः ॥ सूर्ये चरराशिस्थे दशमाच्युते नवमाष्टमाद्गते चंद्रे लग्नम पश्यति विदेशस्थे पितरि जातः ॥ स्थिरस्थे द्विस्वभावस्थे वार्के मध्याद्भ्रष्टे चन्द्रे लग्नमपश्यति स्वदेशस्थित तस्य मार्गस्थितस्य पितरसंनिधौ जातः ॥ तदुक्तं ॥ होरामकरध्वजे लग्नमपि तमीगेहस्थिते शशिनि जातः ॥ मेषस्यरणाच्युते स्थिरभे भानौ विदेशगत इति ॥ १ ॥ योगांतरमाह ॥

२ प्रथम ॥

२।११

व. हं० टी०
९३

सर्पवेष्टितज्ञानमाह॥ शशांक इति॥ चंद्रे भौमद्रेष्काणगते शुभेषु लग्नाद्धनलाभस्थेषु सर्पो जात इति वाच्यं॥ भौमद्रेष्काणे मेषालि मी
नौ घो: कर्कधनुर्मेषाद्वितीय:॥ सिंहमीनयोस्तृतीय:॥ किं च पापग्रहसंबंधिनि लग्ने भौमद्रेष्काणगते शुभेषु लोप ११ स्थेषु सर्पवेष्टि
तो जायते॥ तत्रापि मेषालि प्रथम: सिंह: तृतीय:॥ क्षीणचन्द्रे कर्के द्वितीय: ३॥ एवं जरायुवेष्टितयोर्ज्ञानमाह॥ चतुष्पदग
ते॥ रवौ मेषवृषसिंहधनुःपरार्द्धमकरपूर्वार्द्धाःस्यतमस्थेषु शेषखगेषु द्व्यंगगेषु बलिषु चेत् जरायुवेष्टितौ द्वौ जायते॥ ४॥ ना
लवेष्टितज्ञानमाह॥ छागेति॥ मेषसिंहवृषास्यतमे लग्ने लग्ने शनौ कुजो वा नालवेष्टितो जायते॥ कुजार्के तराहु॥ रा

शशांके पापलग्ने वा वृश्चिके शत्रुभागगे॥ शुभैः सौम्यस्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा॥ ३॥ चतुष्पदगते भा
नौ शेषैर्वीर्यसमन्विते॥ द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ॥ ४॥ छागसिंहवृषे लग्ने तत्स्थे सौरेऽथवा कु
जे॥ राश्यंशसदृशे गात्रे जायते नालवेष्टितः॥ ५॥ न लग्नमिन्दुं च गुरुर्निरीक्षते न वा शशांकं रविणा समा
गतं॥ सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्॥ ६॥

२१ शीति॥ लग्नं न वा शशिः कालांगानी स्यादीय वो कु: तत्र [illegible] नालवेष्टित:॥ ५॥ अथ जारजातकज्ञानमाह॥ न लग्नमिति॥ गुरुर्ल
ग्नं चन्द्रं न पश्यति चन्द्रलग्नावेकराशिस्थौ शिवा गुरुणेव पश्यति तदा जारजातको ज्ञेय:॥ चन्द्रलग्नयोर्जीवनांशस्य योर्न परजात:॥
तदुक्तं॥ अजीवभागे खनवेक्षिते वा जीवे [illegible] चन्द्रे च विलग्नभे वा॥ जातं परोद्भूतमिति ब्रुवंति वा योजनेता विवलाव लोकि कादि
ति॥ रवियुक्तं चन्द्रं गुरुर्न पश्यति तदापि परजात:॥ भौमशनियुतो वा यदि चन्द्रेणापि युतस्तदापि परजात:॥ चन्द्रे गुरुक्षेत्रे द्रेष्का
णे न वांशे वा दृशांशत्रिंशांशास्यतमगे गुरुयुक्ते वा न परजात:॥ तदुक्तं॥ गुरुक्षेत्रगते चन्द्रे तद्युते वान्यराशिगे॥ तद्द्रेष्काणे नवांशे वा न परे

सप्रामृता

पित्व्वंधनयोगंवैतालिके नाह॥ क्रूरर्क्षेति॥ यदा क्रूरग्रहराशिगतौ कुजशनी रवेः सप्तमे पंचमे नवमस्थौ तदा पिता बद्धो वाच्यः॥ चरराशिगेऽर्के परदेशे स्थिरगे स्वदेशे द्व्यंगगे पथि पिता पथिवद्धो वाच्यः॥७॥ पोतप्रसवं वैतालिके नाह॥ पूर्णेति॥ कर्कस्थे चन्द्रे पूर्णे बुधे लग्नगते गुरौ चतुर्थे नौ गता प्रसूयते॥ शुक्रस्य मते भावाज्ञी वदन्ति व्याख्याने॥ योगांतरमाह॥ लग्नेति॥ मकरपश्चिमार्धे कर्के मीनान्यतमे लग्ने सप्तमे च चन्द्रे नौगता प्रसूयते॥८॥ जले प्रसवं वैतालिके नाह॥ आप्येति॥ जलराशौ लग्नं चन्द्रश्च तदा जलस

मतिभूमि स्थाने वसंततिलके नाह॥ होरेति॥ लग्नस्य पानवांशस्तदीशोन्यगुक्तो यदि राशिः॥ लग्नभवांशेशोयदृष्टौ स्थितस्तत्तुल्यभूमौ मतिर्वाच्या॥ तद्य था॥ लग्ननवांशाधिपे घटमिथुनस्थे गर्हे मतिः। कर्ककन्यामकरमीनान्यमस्थे ऽन्तपे सिंहस्थे ऽरण्ये तुलास्थे ऽद्भूमौ॥ वृश्चिकस्थे गर्ते धनुस्थे ऽस्व प्रचारभूमौ॥ मेषस्थे ऽजाविप्रचारभूमौ। वृषस्थे लग्ननवांशाधिपे गोप्रचारभूमौ मतिरिति॥ न केवलं नवांशाधिपाश्रितराशिर्वदेशे न भूर्वा च्या किं तु योगेक्षणादिभिरप्येतत्कल्प्यं॥ अयमर्थः॥ लग्ननवांशाधिपो यद्दृष्टौ स्थितस्तत्र चेदन्यग्रहस्य योगो दर्शनं वा तत्तद्ग्रहस्य भूमिरेव वा वृश्चिदिहोरेत्यानोक्तावाच्या॥ वदन्ना योगे दर्शने वा बलिनो भूर्वाच्या॥ मोहइति॥ लग्नस्य यावंतो ऽनुदितनवांशास्तेषां संपिंडितानां यावान्कालस्ता वत्कालं मतिसमये मोहो ज्ञानाभावो वाच्यः॥ लग्ने स्वपतिदृष्टे स एव कालो मोहे द्विगुणो वाच्यः सौम्यदृष्टे लग्ने कालस्त्रिगुणो वाच्यः॥ एवस्वामिना

होरानवांशकपयुक्तसमान … भूमौ योगेक्षणादिभिरतः परिकल्प्यमेतत॥ मोहस्तु मत्युसमयेनुदितांशतुल्यः स्वांशेक्षिते द्विगु

सं णित त्रिगुणः शुभैश्च॥१२॥ दहनजलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडंत॥ इति शवपरिणामश्चिंतनीयो य

दि थोक्तः पृथुविरचितशास्त्रव्यक्तयत्नैर्विचिंत्यं॥१३॥

सौम्ययहेण च दृष्टे स कालः षड्गुणो मोहे वाच्यः॥१२॥ मृतस्य शरीरपरिणामं शालिन्याह॥ दहनेति॥ अष्टमभवनगतैर्दहनजलविमिश्रैर्द्रेष्काणैः क्रमाद्भस्मसंक्लेदशोषाः परिणामाः स्युः॥ अयमर्थः॥ लग्नद्रेष्काणगतं वा विंशो द्रेष्काणो यदि दहन द्रेष्काणः पापग्रहद्रेष्काणस्तदा मृतदेहो ऽग्निना दह्यते भस्मरूपः परिणामः अष्टमे द्रेष्काणो यदि जलद्रेष्काणः सौम्यग्रहद्रेष्काणस्तदा संक्लेदः॥ मृतदेहो जले क्षिप्यते॥ यदि संमिश्रद्रेष्काण स्तदा शोषः न दह्यते नापि जले क्षिप्यते एवमेव शुष्यति॥ सौम्यद्रेष्काणः पापयुक्तो मिश्रः पापद्रेष्काणो वा सौम्ययुक्तो मिश्र इति॥ व्यालेति॥ अष्टमस्थैर्व्यालव र्गैः सर्पद्रेष्काणैर्विडंतः विरूपएवांतः परिणामो यस्य सः॥ मृतः श्वशृगालादिभिर्भक्ष्यते इत्यर्थः॥ कर्कटस्य द्वितीयो वृश्चिकाद्यद्वितीयो मीनांत्यश्च व्यालद्रेष्काणः॥ तदुक्तं॥ शशिगृहपूर्वापरगौ कीटस्य चमीनपश्चिमाभागः॥ निधनेयस्य द्रेष्काणास्तत्र मृतस्य मांसानि भुंजंति वायसाद्याः प्राणिनश्च शृगालाः श्वानस्ते इत्यर्थः॥ पापग्रहद्रेष्काणे यस्याष्टमराशिसंस्थितो भवति। दहनं प्राप्नोति नरो मृतमात्रो निश्चितं प्रवेत्॥ एवं सौम्यद्रेष्काणे जलमध्ये क्षिप्यते नरो मृतः॥१२॥ सौम्यद्रेष्काणः पापयो पापद्रेष्काणो पि सौम्यसंयुक्तः॥ यस्याष्टमभवनगतः शोषं प्राप्नोति मरणांते इति॥ एवंशवस्य परिणामो यथोक्तो विचिंत्यः॥ गसनकादिपृथुविरचितशास्त्रमिदमेव।

राम
५९

115

ततानरकन्नानमालिन्याह॥ गुरुरिति॥ गुर्वादयो विबुधादिलोकागतान् जनान् अनेके प्राग्जन्मनि कुर्युः। किं भूतो गुर्वादयः। द्रेष्काणेति॥ च रविचंद्रयोर्यो वली तेनाश्रितोपत्र्यंशो द्रेष्काणः तस्य नाथाः स्वामिनः सेतद्रत्यर्थः॥ अयमर्थः। सूर्यचंद्रमयोर्वली नाश्रित द्रेष्काणेशो गुरौ देवलोकादागत इति वाच्यं॥ चंद्रशुक्रयोरन्यत द्रेष्काणेशोपि पितृलोकादागतः। रविकुजान्यतमे द्रेष्काणेशे तिर्यग्लोकादागतः। शनिबुधान्यतमे द्रेष्काणेशे नरकादागत इति॥ तत्रापि श्रेष्ठमध्यहीनाल स्त्रीन् माह॥ प्रवरेति॥ तुंगह्रासानुरूपं उच्चस्थान चलनाक्रमेण प्रवरसमनिकृष्टान्तसममध्यहीनान् ग्रहाः पूर्वोक्ताः कुर्युः। अयमर्थः। यस्य ग्रहस्य लोकादागतः स चेदुच्चस्थस्तदा तल्लोके प्रधान आसीत्। उच्चराशिच्युतो नीचमप्राप्तः तदा सोमध्य आसीत्॥ लोकेशो ग्रहो यदि नीचस्तदा तल्लोके ऽधम आसीत् सीतिज्ञेयः॥१४ मृतस्य गतिं मालिन्याह॥ गतिरिति॥ रिपुरंध्रत्र्यंशपः षष्ठाष्टमद्रेष्काणेशो गतिं दद्यात् पूर्वश्लोकोक्तां गतिं दद्यात् इत्यर्थः॥ अयमर्थः॥ यस्य जन्मलग्नात् षष्ठा

गुरुरुडुपतिशुक्रौ सूर्यभौमौ यमज्ञौ विबुधपितृतिरश्चो नारकीयांश्च कुर्युः॥ दिनकरशशिवीर्याधिष्ठितत्र्यंशनाथाः प्रवरसमनिकृष्टास्तुंगह्रासा नुरूपं॥१४॥ गतिरपि रिपुरंध्रत्र्यंशपो रन्ध्रस्थितो वा गुरुरथ रिपुकेन्द्रछिद्रगः स्वोच्चसंस्थः॥ उदयति भवने ते सौम्यभागे च मोक्षो भवति यदि वलेन प्रोज्झितास्तत्र शेषाः॥१५॥ इति श्रीवराहमिहिरविरचिते वृहज्जातके निर्याणाध्यायः॥२२॥

ष्टमस्थानयोः स्वामिनो रसमसपिते ततः कालं षष्ठाष्टमयोर्द्रेष्काणेपञ्चोभस्य मे द्रेष्काणः। तयोर्यो विपतीतयोर्यो वलवान् तस्य लोकोपः पूर्वोक्तः सरावस्य गतिरिति॥ तेन मृतेन तत्र गंतव्यमित्यर्थः॥ अस्तीति॥ वाशब्दार्थः॥ सप्तमस्थस्त्रकारो वा शब्द मग्रश्च ग्रहो निजगतिप्रदो भवति॥ यदि षष्ठसप्तमाष्टमानां मध्ये द्वौ त्रीणि वा सग्रहाणि॥ अथैकस्मिन्नपि छात्रयो ग्रहास्तदा तेषां यो वली तल्लोके मृतस्य गति वाच्या॥ तदुक्तं। सुरपितृतिर्यग्नरकान् गुरुरिन्दु सितावसृग्रवी ज्ञयमौ॥ रिपुरंध्रत्र्यंशकपा नयंति चास्तारिनिधनस्था इति॥ मोक्षगतिमाह॥ गुरुरिति॥ ग्रथ गुरुः षष्ठ केन्द्रगो ष्टमो वा तदेको योगः॥ मीने लग्नगते सुभग्रहेन वांशगो गुरुः अन्ये वलहीना स्तदा द्वितीयो योगः एतयोर्द्वयोर्जातस्य मोक्षगतिः अन्ययोगे मृतकालेपि वर्तमानो मोक्षदो॥ तदुक्तं। षष्ठाष्टमकंटयोरुच्चेवावसाने लग्ने वांशे

वृ॰ मटी॰
५९

अथनष्टजातकाध्यायः॥ तत्रप्रसूतिकालमिंदुवज्रयाह॥ आधानेति। यस्याधानकालो ज्ञायते तस्याधानकालादेवजन्मोक्तं॥ तत्कालमिंदुसहितेत्याह्निना। जन्मकालो पिज्ञात्वा एवमाधानजन्मकालयोरज्ञानेप्रष्टुः प्रश्नलग्नात्जन्मप्रवदेत्॥ पश्चाल्लग्नग्रहांश्चस्पष्टान्लावक्ष्यमाणविधिना सर्वंवाच्य मित्यर्थः॥ तत्रायनमाह॥ पूर्वेति॥ पश्चाल्लग्नस्यपूर्वापरार्द्धयोः सूर्योत्तरदक्षिणायनयोजन्मवदेत॥ अयमर्थः॥ लग्नाद्यहोरायां मकरादिराशिषट्कगते॥ र्कजन्मवाच्यं॥ लग्नद्वितीयहोरायांकर्कादिषट्कगतेर्केजन्मवाच्यं॥१॥ वर्षर्तुज्ञानमुपजात्याह॥ लग्नत्रिकोणेति॥ लग्नत्रिकोणेषु प्रश्नलग्नं पंचमनवमेषु त्रिभागैर्लग्नद्रेष्काणैर्गुरुं कल्पयेत्॥ अयमर्थः॥ प्रश्नलग्नस्यप्रथमद्रेष्काणोदयेसएवलग्नराशिस्तत्रस्थेगुरौजन्मवाच्यं॥ लग्नद्वितीयद्रेष्काणोदयेलग्ना त्पंचमराशिस्थेगुरौजन्मवाच्यं॥ लग्नतृतीयद्रेष्काणोदयेलग्नान्नवमराशिगेगुरौजन्मेति॥ पद्यप्यत्रसामान्येनगुर्वस्यनमुक्तं॥ तथाद्वादशांशक्रमेणप्रतिरा

आधानजन्मापरिबोधकालेसंपृच्छतोजन्मवदेद्विलग्नात्॥ पूर्वापरार्द्धेभवनस्यविंद्याद्भानावुदग्दक्षिणमेप्रसूतिं॥१॥ लग्नत्रिकोणेषुगुरुस्त्रिभागैः प्रकल्प्यवर्षाणिवयोनुमानात्॥ ग्रीष्मोर्कलग्नेकथितास्तुशेषैरन्यायनर्त्तावृतुरर्कचारात्॥२॥ २॥ २॥

२

शौगुरुःसंचारणीयः॥ यथाप्रश्नलग्नस्यप्रथमद्वादशांशोदयेलग्नराशिगेगुरौजातः द्वितीयद्वादशांशोदयेद्वितीयस्थेगुरौजातः॥ एवं तृतीयादिद्वादशभागोदये तृतीयादिषुगुरुःस्थः॥ विकल्प्येति॥ एवंगुरोरवस्थानंज्ञात्वातस्यवयोनुमानाद्वर्षाणि विकल्प्यावदेत्। अयमर्थः॥ तस्माकृतिमवेक्ष्यवयोनुमानंकार्यंतत्रद्वादशवर्षेषु गुरौराशिचक्रभ्रमणंभवति॥ तत्रपुरुषलक्षणोक्तेनदशदशाविभागेनद्वादशवार्षिकांदशांक्षेत्रेषुपरिकल्प्यततक्षेत्रांगसंस्पर्शात्तवर्षज्ञानं॥१॥ तयोक्तंपुरुषलक्षणे॥ यो दौसगुल्फौप्रथमंप्रदिष्टं। जंघेद्वितीयंतुसजानुचक्रौ मिंढोरुमुष्कंचततस्तृतीयं नाभिःकटिश्चेतिचतुर्थमाहुः॥ उदरंकथयंतिपंचमं हृदयंषष्ठमथस्तनान्वितं॥ अथस सममंसजत्रुणीकथयंत्यष्टममोष्ठकंधरे१ नवमंनयनेचसभ्रुणीसललाटंदशमंशिरस्तथा॥ अशुभेष्वशुभंदशाफलंचरणाद्येषुशुभेषुशोभनमिति॥२॥ एवंविंशत्यधि केवर्षशतेजातेवर्षज्ञानोपायोनास्ति॥ एवंवर्षज्ञानेऋतुज्ञानमाह॥ ग्रीष्मइति॥ एषालग्नगतेर्केदेंद्रेष्काणेवाग्रीष्मोज्ञेयः॥ शेषेष्वन्यग्रहेषुलग्नद्रेष्काणेवालग्नगेः कथिताऋतवःपूर्वमुक्तास्त्यर्थः॥ उक्तंच॥ द्रेष्काणैःशिशिरादयःशशिकुजज्ञाद्येषुसवेति। तद्यथा॥ लग्नगेशनौतद्रेष्काणेवाशिशिरः॥ एवंशुक्रेवसंतः कुजेग्री ष्मः। चंद्रेवर्षाः। बुधेशरत्। गुरौहेमंतइति॥ वक्रेषुलग्नगेषुबलिनःऋतः। लग्नगग्रहाभावेद्रेष्काणेशात्तुः। अन्येति॥ अन्यस्मिन्नयनेऽन्यस्मिन्ऋतौरविचारवशेनऋ

अथ जन्मलग्ने ग्रहंपरिवर्त्तनाद् तुर्जन्मसंतति विज्ञानं चेंद्र वत्र्याह ॥ चंद्रारेति ॥ अयने विलोमे विपरीतेस तिलग्नग ग्रहे वशात् ऋतु स्थाने पर्यापनं विपरीतं
भवतितदा चंद्र बुधगुरवः शुक्र कुज शनिभिः परिवर्त्याः अल्पेयत्स्याप्य ॥ चंद्रः शुक्रेण बुधः कुजेन । गुरुः शनिना । अयमर्थः । यद्युत्तरायणे वर्षाज्ञातः तदा
वसंतोज्ञेयः एवं चंद्रः शुक्रेण परिवर्त्तितः । अथ दक्षिणायने वसंतः तदा वर्षाज्ञेयेति । शुक्रश्चंद्रेण परिवर्त्तिः । अथोत्तरायणे शरत् तदा ग्रीष्म ॥ दक्षिणा
यने ग्रीष्म चशरदिति ॥ बुधकुजावन्योन्यं परिवर्त्ततो ॥ उत्तरायणे हेमंते शिशिरः दक्षिणायने शिशिरे च प्राप्ते हेमंत इति गुरुशनी परिवर्त्तितौ इति ॥ एवमृतो ज्ञाते
मासज्ञानमाह ॥ द्रेष्काणेति ॥ प्रश्नलग्न द्रेष्काणस्य पूर्वभागे पूर्व ज्ञातर्क्षीः पूर्वो मासः । द्रेष्काणोत्तरार्द्धे तद्गतो द्वितीयो मासः । एवं कोपस्थानेन मासज्ञानं ॥ ति
थिज्ञानमाह ॥ अनुपातादिति ॥ अत्रयातांत्रे राशिकातिथिः कल्प्या लग्नस्य षड् लिप्ता शतानि द्रेष्काणः तेन चक्रतुज्ञानं ॥ तद्दर्द्धे लिप्ता शतत्रयं तेन मासज्ञा
नं । अत्रानुपातात्तिथिर्लिप्ताद् शकेनैके काज्ञेया ॥ एवतिथिरा हि त्पभागः एवमर्कस्य राशयो भागाश्चज्ञेयः । मासा राशयस्तिथयो भागाः ॥ ज्ञातवर्षयथा प्र

चंद्रगुरुजीवाः परिवर्त्तनीयाः शुक्रार्कमंदेरयने विलोमे ॥ द्रेष्काण भागे प्रथमेनुपूर्वो मासोनुपाताच्च तिथि र्विकल्प्या ॥ ३ ॥ अत्रापि होरापट

पु वोद्धि जैः सर्वादितुल्यां तिथिमुद्दिशंति ॥ रात्रिं संज्ञेषु विलोमजन्म भागेष्ववेला क्रमशोविकल्प्या ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥

र्द्धिताशोर्कस्ततिथौ जन्मेति ज्ञेयं ॥ ३ ॥ चांद्रमासेन तिथिमाह ॥ अत्रापीति ॥ अत्रतिथिस्नानि होराशास्त्रज्ञाः भवन्ति । अर्कभागसमांतिथिं वदंति प्रश्नकाले ना का
लिकार्कणायावंतोंशा भुक्तास्तावंतः शुक्लप्रतिपदादितिथयो भुक्ता वाच्याः ॥ अत्र चांद्रमानेमकरस्थे ज्ञातमाघो मासोज्ञेयः ॥ एवमस्थेष्वपि मासा सकल्पना ॥ त
दुक्तं ॥ पृच्छाकालेरविर्यावंतोंशाः । स्फुटेन संभुक्ताः ॥ एवेमस्ताति थयः शुक्लादावर्कमासस्येति ॥ एवं दिने ज्ञाते रात्रिदिवाजन्मज्ञानमाह ॥ रात्रीति ॥ रात्रिपुर्संज्ञा
राशयः पूर्वमुक्ताः । गोजाश्विस्यादिना ॥ रात्रि दिन संज्ञेषु लग्नेषु विपरीतं जन्मज्ञेयं ॥ अयमर्थः ॥ मेषवृषमिथुनं कर्क धनुर्मकराख्यतमे प्रश्नलग्ने दिने जन्मः ॥ अन्ये
षु रात्राविति ॥ एवं दिनरात्रि ज्ञाने वेलामाह ॥ भागैरिति ॥ लग्नगैर्विक्रमशः परिप्याघविलाकल्प्या जन्मसमयो ज्ञेयः ॥ अयमर्थः ॥ जन्मादिने रविर्ज्ञातस्तस्मादिनरा
त्रिप्रमाणमानीय यदि दिवाजन्मतदा दिनप्रमाणेन रात्रिजन्मेरात्रिप्रमाणेमतकालप्रश्नलग्न भुक्तपलानि संगुणपत्तस्यस्वदेशराशुदयप्रमाणेनभाग मयहृत्ता

118

ब्र.मु.टी.
६०

मासांतरेणमासमाह॥ केचिदिति॥ केचित्तु इत्युक्तान्त्रवांशात्शुक्लांतसंज्ञमासं वदंति॥ अयमर्थः॥ प्रश्नकाले यस्मिन्त्रवांशे चंद्रस्तमपिनवांशंनवधाहत्वापस्मिन्नवांशानमेंशे चंद्रस्तद्गतनक्षत्रमन्वेष्यं। तन्नक्षत्रसंबंधिनि शुक्लांतसंज्ञे मासि जन्म वाच्यं॥ यथा॥ हस्तिकाद्युक्ताकार्तिकी पौर्णमासीतयायुक्तः कार्तिकः॥ एवंमार्गादेः॥ यस्यनक्षत्रस्य शुक्लांतसंज्ञो मासीनास्तितस्य गुरुचारोक्तविधिनाशुक्लांतसंज्ञोमासः कल्प्यः॥ तच्चोक्तं॥ नक्षत्रेणसहोदयमस्तं वायातियेन सुरमंत्री॥ तत्संज्ञं वक्तव्यं वर्षमासक्रमेणैव २ वर्षाणि कार्तिकादीन्याग्नेयाद्भद्वयानुयोगीनि॥ क्रमशस्त्रिभंतुपंचममुपांत्यंचयद्वर्षमिति॥ तत्र चंद्रे वृषनवांशेतन्नवांशसप्तकस्यार्वाग्भवति तदा कार्तिको मेषः॥१॥ वृषनवांशेतद्वंशसप्तकोर्ध्वं मिथुननवांशेतद्वंशषट्कस्यार्वाक् तदा मार्गशीर्षः २ मिथुननवांशषट्कोर्ध्वं कर्कनवांशपंचकार्वाक् पौषः॥३ कर्कनवांशेतन्नवांशपंचकोर्ध्वं सिंहनवांशेतन्नवांशचतुष्पार्वाग्माघः॥४॥ सिंहनवांशेतन्नवांशचतुष्कोर्ध्वं कन्यानवांशेतन्नवांशसप्तकार्वाक् चंद्रे फाल्गुनः ५ कन्यानवांशेतन्नवांशसप्तकोर्ध्वं तुलानवांशषट्कार्वाक् चंद्रे चैत्रः ६ तुलानवांशेतन्नवांशषट्कोर्ध्वं वृश्चिकनवांशेत

त्न

केचिच्छशांकाश्रितान्नवांशाच्छुक्लांतसंज्ञं कथयंति मासं॥ लग्नत्रिकोणेत्तमवीर्ययुक्तं भंप्रोच्यतेऽन्ये भमाहुरिन्दोः॥ ५॥ ॥ ५॥

न्नवांशसप्तकोर्ध्वं [illegible] धनुर्नवांशेतन्नवांशपंचकार्ध्वं धनुर्नवांशेतन्नवांशचतुष्पार्वाक् चंद्रे ज्येष्ठः ८ धनुर्नवांशेतद्वंशचतुष्कोर्ध्वं मकरनवांशेतन्नवांशत्रयार्वाक् चंद्रे आषाढः ९ मकरनवांशेतद्वंशेतद्वंशत्रयोर्ध्वं कुंभनवांशेतन्नवांशद्वयार्वाक् चंद्रे श्रावणः॥१० कुंभनवांशेतद्वंशद्वयोर्ध्वं मीननवांशेतन्नवांशपंचकार्वाक् चंद्रे भाद्रपदः ११ मीननवांशेतन्नवांशपंचकोर्ध्वं मेषनवांशेतन्नवांशाष्टकार्वाक् चंद्रे त्वाश्विनः १२॥ अथ मेषनवांशेतन्नवांशपंचकार्वाक् चंद्रे भाद्रपदः ११ मीननवांशेतन्नवांशपंचकोर्ध्वं मेषनवांशेतन्नवांशाष्टकार्वाक् द्वंशाष्टकाद्ध्वं कार्तिकं वदंति॥ यस्मात्पूर्वोक्तविधिनाकृत्तिकारोहिण्यौ कार्तिकः॥१ मृगार्द्रे मार्गः २ पुनर्वसुपुष्यौ पौषः ३ सार्प्यमघे माघः ४ पूर्वाद्वित्रयं फाल्गुनः त्रिभं पंचममित्युक्तेः ५ चित्रास्वाती चैत्रः ६ विशाखानुराधे वैशाखः ७ ज्येष्ठामूले ज्येष्ठः ८ पूर्वोत्तराषाढे आषाढः ९ श्रवणधनिष्ठे श्रावणः १० शततारादित्रयं भाद्रः ११ रेवत्यादित्रयमाश्विनः १२ उपांत्यंद्वित्रयमंत्यं चेत्युक्तेः शुक्लांतग्रहणेमेतत्त्रायपतिपत्॥ शुक्लपक्षांतेतेन नक्षत्रेणायुक्तस्तदुपलक्षितोमासोवाच्य॥ यथा॥ शुक्लपक्षांते कृत्तिकारोहिण्यन्यतमेनयुक्तः कार्तिकोमा

राम
६०

सः ॥ एवमन्येपि पूर्वोक्तविधिना मासा ज्ञेयाः ॥ मासस्तु कस्मिन् पक्षांत एवमाह ॥ तदुक्तं ॥ यद्राशिसंस्थे शीतांशुः प्रश्नकाले नवांशके ॥ स्थितस्तद्राशियः सूर्यो यस्मि
न् भवति चंद्रमाः जन्ममासः स निर्दिष्टः पूर्वपक्षस्तु पृच्छतः ॥ कस्मिन् पक्षांतके मासो विज्ञेयोऽत्र विपश्चितेति ॥ मासे ज्ञाते एवं शिज्ञानमाह ॥ लग्नेति ॥ प्रश्नलग्नस्य तस्मा
न्नवमपंचमयोश्च मध्यादुत्तमेनोत्कृष्टेन बलेन युक्तं भराशिरुच्यते ॥ लग्नत्रिकोणेषु यो बली तद्राशिगो चंद्रे जन्म वाच्यमित्यर्थः ॥ तदुक्तं ॥ होरादिवीर्याधिकत्वमा
जिस्थाने त्रिकोणे शशिनो वधायमिति ॥ पक्षांतरमाह ॥ अंगेति ॥ अंगस्पर्शनादिभिर्वा राशिर्ज्ञेयः ॥ अयमर्थः ॥ कालांगानीत्यादिना कालनरउक्तः तत्र प्रश्ने
प्रश्नकाले शिरआदि यदंगं स्पृशति तदंगसंधी चंद्रराशिर्ज्ञेयः ॥ आदिपदाद्राशिप्रोक्तसत्वानां स्पर्शनं च भवतो द्यते ॥ ५ ॥ प्रकारांतरेण जन्मराशिज्ञानमाह ॥
यावदिति ॥ पृच्छालग्नाच्चंद्रो यावद्भूतः यावति राशौ स्थितः तावति तावति यद्राशौ चंद्रो ज्ञेयः ॥ एवं चं जन्मराशिं वदेत ॥ मीनेति ॥ मीने प्रश्नलग्ने मीनयु
ग्मे नराशिरेव ज्ञेयो न पूर्वोक्तः ॥ एवमनेकधा राशौ प्राप्ते विशेषमाह ॥ भक्ष्येति ॥ भक्ष्येण हरणेनाकारेण रुतेन शब्देन चिंत्यं राशिर्विचार्यः ॥ अयमर्थः ॥

यावद्भूतः शीतकरो विलग्नाच्चंद्राद्दे तावति जन्मराशिः ॥ मीनोदये मीनयुगं प्रदिष्टं भक्ष्याहृताकाररुतैश्च चिंत्यः ॥ ६ ॥ होरानवांशप्र
तिमं विलग्नं लग्नाद्रविर्यावति च द्रेक्काणे ॥ तस्माद्वदेत् तावति च विलग्नं प्रष्टुः प्रसूताविति शास्त्रमाहुः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

पद्राशेः संबंधि भक्ष्यं द्रव्यं तद्भक्ष्यं तद्भक्ष्यप्रियो नरो दृश्यते आनीयते वा तद्राकारो वा दृश्यते तस्य राशिः प्रोक्तो वा श्रूयते ॥ तद्राशिगे चंद्रे जातो ज्ञेयः ॥ यथा मार्जारा
दिदर्शने सिंहः ॥ महिषादौ वृषइत्यादि ॥ ६ ॥ एवं जन्मराशौ ज्ञाते लग्नमाह ॥ होरेति ॥ प्रश्नलग्ने यो नवांशः राशिस्तत्तुल्यं लग्नं वाच्यं ॥ प्रश्नलग्नं नवांशसमानमेव लग्न
मित्यर्थः ॥ पक्षांतरमाह ॥ लग्नादिति ॥ लग्नात् प्रश्नलग्नद्रेष्काणात् आरभ्य यावति यत्संख्ये द्रेष्काणे रविः स्थितस्तस्मात् त्रयात् तावत्संख्ये राशौ प्रष्टुः प्रसूतौ
जन्म निलग्नं वदेत् ॥ इति शास्त्रविदन्तिन मयाकल्पितमुच्यते इत्यर्थः ॥ द्रेष्काणगणनया क्षाद्रशाधिके द्वादशाभिर्भागं हृत्वा शेषं संख्याया लग्नं वाच्यं ॥ तदुक्तं ॥
प्रश्नलग्ननवांशस्य यो राशिः संज्ञयाय समः तस्मिन् लग्नगते राशौ वक्तव्यं जन्म पृच्छतः ॥ यावत्संख्ये गता लग्नात् द्रेष्काणे दिनकृत्ततः ॥ तावत्संख्ये कृते
राशौ प्रष्टुर्जन्म विनिर्दिशेत् ॥ ७ ॥ श्रीकृष्णायनमः श्रीगणेशायनमः श्रीविश्वेश्वरायनमः श्री अन्नपूर्णास्वामिन मः ॥ श्रीभैरवायनमः ॥ श्रीरामायनमः ॥

व॰प्र॰
६१

प्रकारांतरेण लग्नानयनमिह वज्रयाह॥ जन्मादिशो दिति॥ लग्नगतेयदि बहूनां लग्नगते बलवति लग्नगताभावे सर्वेषां बलवतिग्रहे छायांगुल ग्रेसतिष्ठा
दशाहतेशेषं वदेत्॥ अयमर्थः॥ पृच्छालग्नगतंग्रहं तात्कालिकास्पष्टं कृत्वा। लिप्तापिंडं कुर्यात्॥ ततः सममसौ वा दशांगुलं शंकुं संस्थाप्य तस्य छायायां वंर्ण्यं
गुलानि तैलिप्तापिंडं गुणपुष्टा दशभिर्भजेत्॥ यावांनेकोः वशिष्टतत्संख्यंमेषादिलग्नं तेयं जन्मनीति॥ प्रकारांतरमाह॥ आसीनेति॥ आसीनसुप्तोत्थितत्तिष्ठतांच
तुर्णां पृच्छकानां क्रमात् जाया सुखास्तोदयगं मेजजन्म लग्नं प्रदिष्टं॥ अयमर्थः॥ उपविश्य पृच्छति प्रश्नलग्नात् सप्तमं जन्मलग्नं शेषायाने पृच्छति प्रश्नलग्नाच्चतु
र्थं जन्मलग्नं उत्थिते व्रजति पृच्छति प्रश्नलग्नाद् दशमं जन्मेति स्थितिपृच्छकेसति प्रश्नलग्नमेव तज्जन्मलग्नमिति॥ उक्तंच गुतिष्ठतो विलग्नात् प्रसुप्तः सुप्तस्य
धुलग्नाच्च उपविश्यसास्तमये व्रजतो मेषरण्यस्थानादिति॥ ८॥ प्रकारांतरेण सर्वनष्टजातकं शार्दूलविक्रीडितेनाह॥ गोसिंहाविति॥ गोसिंहादयः प्रश्नलग्नगता

जन्मादिश्ये त्रयगे वीर्यगैर्वा छायांगुल घ्नैर्कतृतावशिष्टे॥ आसीनसुप्तोत्थितत्तिष्ठतांभंजायासुखाज्ञोदयगं प्रदिष्टं॥ ८॥ गोसिंहौ जितुमाष्टमे क्रि
यतुले कन्यान्त्यगौच क्रमात्संवर्ण्याद्दशकाष्टसप्तविषयैः शेषाः स्वसंख्यागुणाः॥ जीवोंरिकुजि दैंरवाः प्रथमवच्छेषाग्रहाः सौम्यवद्राशीनांनि
यतो विधिर्ग्रहयुतौ कार्यं च तद्गुणनं॥ ९॥ ७१

लिप्तापिंडीकृताः संतः क्रमात्॥ दशकादिभिर्द्वैः ससर्वां गुणनीयाः॥ शेषा अनुक्ताः स्वसंख्यया गुणनीयाः॥ अयमर्थः॥ वृषसिंहो प्रश्नलग्नगतौ स्यातां लिप्तापिंडी
कृतौ दशभिर्गुणयेत्॥ मिथुनवृश्चिकावीदृशौ अष्टमिः मेषतुले सप्तभिः कन्यामकरौ पंचभिः कर्कं चतुर्भिः धनुर्नवभिः॥ कुंभे काद्दशभिः मीन द्वादशभिरिति॥ एवं राशी
नां विधिर्नियमात् उक्तः॥ ग्रहयुतेलग्ने तद्गुणग्रहगुणनाच कर्तव्यः॥ तानेवाह॥ जीवेति॥ गुरु कुज शुक्र बुधाः प्रथमवत् दशकादिभिः क्रमात् गुणनीयाः॥
अयमर्थः गुरौ लग्नगते तमेव लग्ने स्वगुणकारहतं दशभिर्गुणयेत् कुजे अष्टभिः शुक्रे सप्तभिः बुधे पंचभिरिति॥ शेषा ग्रहाः रविचंद्रशनयः सौम्यवद्
ध्रुवत्संचभिर्गुणनीया इत्यर्थः॥ बहुषु लग्नगेषु सर्वेषां गुणकैर्गुणयेत्॥ एवं गुणितांकं स्थापयेत्॥ १॥ ७॥ १॥ २॥ ३॥ ९॥ १॥ श्रीकृष्णजी

१२१

२४

तस्मान्नक्षत्रानयनं वसंततिलकेनाह ॥ सप्ताहतमिति ॥ प्राक्स्थापितोंकः सप्तगुणः कार्यः तत्र नवदेयाः शेषाभावाय दानशेषानदेयाइत्यर्थः ॥ अयमर्थः ॥ चरेलग्नेगेनवदेयाः स्थिरेनवशेषाः द्विस्वभावेनदेयानशेषाः ॥ केषांचिन्मतेलग्नप्रथमद्रेष्काणेनदेयाः द्वितीयेशेषाभावतृतीयेनोभयमिति एवंकृतात्रियत्नेन सप्तविंशत्याभक्तेः शेषतुल्यकाशेषांके अश्विन्यादि जन्मभंस्यं ॥ केषांचिन्मतेसप्तविंशतिभक्तानंतरं नवकादानविशेषाधनेकार्यमिति ॥ एवंमिति ॥ प्रश्नलग्नात सप्तमादिराशिभ्यो लग्नवशेन प्रसूतिर्येषां कलत्रारीनां जन्मवदेत ॥ अयमर्थः ॥ यदाभार्यायान ष्टजातकं पृच्छतितदातात्कालिकलग्नेराशिषट्कं देयं ॥ भ्रातुः पश्चेराशिद्वयं देयं । पुत्रे अश्वेचतुष्पंचरि पुनष्टजातकं प्रश्नराशिपंचकं लग्नेदेयं ॥ एवं कृते तदेवोदयराशिः प्रकल्प्यत्तदुक्तगुणकारेणसगुणपूत्तस्यप्रदगुणकारेणापिसंगुण्य । नवकदानविशेषाधनेकृत्वासप्तविंशत्याविभज्यशेषांकतुल्यंभार्यादीनांजन्मनक्षत्रंवाच्यं ॥ इदमुपलक्षणं । राशित्रययुतात्तात्कालिक

सप्ताहतंत्रिघनभाजितशेषमृक्षंदत्वाथवानवविशोध्यनवाथवास्यात् ॥ एवंकलत्रसहजात्मजशत्रुभेभ्यः प्रष्टुर्भवेदुदयराशिवशेनतेषां ॥ १० ॥ वर्षर्तुमासतिथयो द्युनिशंस्युडूनिवेलोदयर्क्षनवभागविकल्पनाद्याः ॥ भूयोदशादिगुणिताः स्वविकल्पभक्ता वर्षादयो नवकदानविशोधनाभ्यां ॥ ११ ॥

सा विज्ञेयादृशकेख्वग्नतुमौसत्येवच ॥ अष्टकेषु च मासार्थतिथ्यवत्तथास्मृताः ॥ १२ ॥ १२ ॥ य

लग्नान्मित्रस्यापिजन्मभं वाच्यं ॥ एवंनवष्टतासितुरपि ॥ एवमन्यस्यापि ॥ १० ॥ वर्षाद्यानयनं वसंततिलकेनाह ॥ वर्षर्तुमासेति ॥ एवं वर्षाद्यः पुनर्दशादिभिः गुणिताः नवकदानविशोधनाभ्यां च युताः स्वविकल्पेनभक्ताः संतोवर्षर्तुमासाद्यो जन्मनिस्युः ॥ अयमर्थः ॥ प्रश्नलग्नंलिप्तापिंडीकृतं राशिगुणकाहृतं संग्रहलब्धं गुणकांहृतं पस्थापितमस्तितस्मिन् राशिचतुष्टये ऽपिनवकदानविशोधनेप्राग्वत्कृत्वा स्वविकल्पैर्भागमपहृत्य वर्षादयो ज्ञेयाइति ॥ ११ ॥ तदेव वर्षाद्यानयनमनुष्टुभ्प्रयेणाह ॥ विज्ञेयाइति ॥ दशकेष्विति वकुलं वर्षयोगि स्यात् ॥ वर्षान्नतुमासादशकेषुज्ञेयाः पक्षतिथयोष्टकेषुज्ञेयाः ॥ अयमर्थः ॥ दशगुणितं राशिनवकविकल्पेन परमायुषा विंशत्यधिकवर्षशतेनविभज्यपोके ऽवशिष्यतेता वंति प्रष्टुर्वर्षाणि ज्ञेयानि ॥ तमेवराशिं स्वविकल्पकतु संख्ययाविभज्यावशिष्टं ऋतुः ऋतुमपिद्विधाविभज्यैकाशेष्ये नाः प्रथमोमासः शून्येचेत्द्वितीयः ॥ एवं कृत्वा दशगुणोराशिरत्यासनीयः ॥ योसावष्टहतोराशिस्तस्मात्विज्ञेयेकाशेषेषु कृष्णपक्षः शून्ये कृष्ण

वृ०ज०टी०
६२

द्वियेति॥ सप्तहृते राशौ दिनरात्रिप्रसवेन नक्षत्रं च ज्ञेयं तद्यथा॥ सप्तहृतराशिं हाप्यो विभज्यैकावशेषे दिवजन्मप्रस्नेरात्रौ॥ तमेव सप्तविंशत्याहृत्वावशिष्टांकसम मश्विन्यादिनक्षत्रं॥ वा कुलीपयोगान्नक्षत्रस्य पुनरयनं॥१३॥ वेलामिति॥ वेलालग्नहोरांशकामेचकेविंघात॥ तद्यथा॥ यदि दिने दिने जन्मज्ञातं रात्रौ वा तद्दिनरात्रिप्रमाणं कलातेन पंचाहृतराशिं विभज्यावशिष्टांकसमे दिनस्य रात्रेर्वा घटिकादिकाले गते जन्म ज्ञेयं॥ एवं कलेज्ञाते रात्रपादिलग्नं कार्यं तस्य च होराद्रेष्काणनवांशद्वादशांशत्रिंशांशाः कार्याः। तात्कालिकश्च ग्रहाः यथोक्तविधिना कार्याः॥ उक्तविधिनाद्रष्टाष्टकवर्गादेर्निर्दिशाच्च एवं नष्टजातकं साधयेत्॥१४॥ अथ प्रकारांतरेण नक्षत्रानयनमार्ययाह॥ संस्कारेति॥ संस्कारो नाम करणरूपस्तत्कृतं यन्त्रस्य मात्रा मतस्य यामात्राह्रस्व एकमात्रः दीर्घो द्विमात्रः हलर्द्धमात्रं। एवंगणनपायानाम्नो मात्रास्ता द्विगुणाः कृत्वा प्रश्नकालीनहारशांशै युक्तांशैकुधायांग्नलसंख्यायुक्ताः कार्याः त्रिनवकेन सप्तविंशत्यातो मात्रा विभज्याव

दिवारात्रिप्रसूतिं च नक्षत्रानयनं तथा॥ सप्तकेपुच वर्गेषु नित्यमेवोपलक्षयेत्॥१३॥ वेलामथ विलग्नं च होरामंशकमेव च॥ पंचके प्रविजानीयान्नष्टजातकसिद्धये॥१४॥ संस्कारनाममात्राद्विगुणाः छायांगुलैः समायुक्ताः॥ त्रिनवकभक्ताः शेषं नक्षत्रं तद्धनिष्ठादि॥१५॥ द्वित्रिचतुर्दशदशतिथिसप्तत्रिगुणान वाष्टचैंद्राद्याः॥ पंचदशाप्तात्तद्दिङ्मुखाच्चितांभधनिष्ठादि॥१६॥ इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टं॥ ग्राह्यमतस्तच्छिष्यैः परीक्ष्य यत्नाद्यथा भवति॥१७॥ इति श्रीवराहमिहरविरचिते बृहज्जातके नष्टजातकाध्यायः॥२४॥ २४॥२६॥२४॥

शिष्टांकसमं धनिष्ठादि नक्षत्रं ज्ञेयं॥१५॥ प्रकारांतरेण नक्षत्रमार्ययाह॥ द्वित्रिचतुरिति॥ द्वौ त्रयः चतुर्दश दशतिथयः पंचदश त्रिगुणाः सप्तैकविंशतिः॥ नव॥ अष्टाएते ऐंद्राद्याः पूर्वाद्यदिशामंकास्तेयाः॥ अयमर्थः॥ पूर्वाभिमुखे पृच्छके पृच्छति सद्वावंकौ स्थाप्यौ॥ एवमग्नेय्यादिमुखे पृच्छति त्र्याद्यंकाः ग्राह्याः॥ एवं दिगभिमुखं प्रच्छकः वशेनांकमाहाय पंचदशगुणितः कार्यः तद्दिङ्मुखानितश्च। तत्र दृष्टोतद्दिङ्मुखाः॥ अत्र शायदि राग्न्यभिमुखः तन्मुखापायतो नरास्तत्संख्ययायुक्तश्च कार्यः॥ एवं कृते यो कस्त सप्तविंशत्याहृत्वावशिष्टांकसमधनिष्ठादितो जन्मनक्षत्रं वाच्यं॥१६॥ नष्टजातकोपसंहारमार्ययाह॥ इति नष्टेति॥ इति नष्टेति॥ इति शब्दसुपसंहारे॥ एवं नष्टजातकमिदं नानाविधिमुक्तं॥ सम्यग्वीनशिष्यैर्यत्नेन परीक्ष्य यथा भवंति सत्यं संवदति तथा तो ग्राह्यं मुक्तान्॥ अहं॥१७॥

पत्र
६२

अथ द्रेष्काणाध्यायः ॥ तत्र मेषाद्यद्रेष्काणस्वरूपं वैतालीकेनाह ॥ कट्यामिति ॥ जघने श्वेतमंबरं वेष्टितं येन सः ॥ श्यामवर्णः ॥ आभिमुख्येन रक्षां कर्त्तुं समर्थ इव भीषणः ॥ लोहि-
तनेत्रो नरः ॥ उच्छ्रितं कुठारं धरति ॥ एष नरद्रेष्काणः ॥ सायुधः कुजसंज्ञश्च ॥ १ ॥ मेषद्वितीयरूपमिंद्रवज्रयाह ॥ रक्तांबरेति ॥ लोहितवस्त्रा अलंकारे भोज्ये च मनो यस्याः सा घटोदरी ॥
अश्ववक्त्रा ॥ पिपासिता ॥ एकाचरणेनोपलक्षिता अयं मेषद्वितीयद्रेष्काणो यवनैरुक्तः ॥ एष चतुःपदद्रेष्काणः स्त्री द्रेष्काणः शुक्रसंज्ञश्च ॥ २ ॥ मेषतृतीयरूपमिंद्रवज्रयाह ॥ क्रूर
इति ॥ विषमस्थ माठः कलाचतुरः पिंगलः ॥ कर्माभिलाषुकः स्खलितनियमः ॥ आभिमुख्येनोद्धृतदंडः पाणौ यस्य सः ॥ रक्तवस्त्रधरः क्रोधनः ईदृशो मेषतृतीयः ॥ एष सायुधो न-

कट्यां सितवस्त्रवेष्टितः कृष्णः शक्त इवाभिरक्षितुं ॥ रौद्रः परशुं समुद्यतं धत्ते रक्तविलोचनः पुमान् ॥ १ ॥ रक्तांबरा भूषणभक्ष्यचिंता कुंभाकृतिर्वाजिमुखी तृषार्त्ता ॥
एकेन पादेन च मेषमध्ये द्रेष्काणरूपं यवनोपदिष्टं ॥ २ ॥ क्रूरः कलाज्ञः कपिलः क्रियार्थी भग्नव्रतोभ्युद्यतदंडपाणिः ॥ रक्तानि वस्त्राणि बिभर्त्ति चंडो मेषे तृतीयः कथि-
न तस्त्रिभागः ॥ ३ ॥ कुंचितलूनकचा घटदेहा दग्धपटा तृषिताशनचित्ता ॥ आभरणान्यभिवांछति नारी रूपमिदं वृषभे प्रथमस्य ॥ ४ ॥ क्षेत्रधान्यगृहधेनुक-
लाज्ञो लांगले च शकटे कुशलश्च ॥ स्कंधमुद्वहति गोपतितुल्यं क्षुत्परो जवदनो मलवासाः ॥ ५ ॥ द्विपसमकायः पांडुरदंष्ट्रः शरभसमांघ्रिः पिंगलमूर्त्तिः ॥ अ-
विमृगलोमा व्याकुलचित्तो वृषभवनस्य प्रांतगतोयं ॥ ६ ॥ सूच्याश्रयं समभिवांछति कर्मनारी रूपान्विताभरणकार्यकृतादरा च ॥ हीनप्रजोच्छ्रितभु-
ध जर्तुमती त्रिभागमाद्यं तृतीयभवनस्य वदंति तज्ज्ञाः ॥ ७ ॥ उद्यानसंस्थः कवची धनुष्मान् शूरोऽस्त्रधारी गरुडाननश्च ॥ क्रीडात्मजालंकरणार्थचिंतं करोति

रद्रेष्काणो जीवसंज्ञश्च ३ वृषप्रथमं दोधकेनाह ॥ कुंचितेति ॥ कुटिलाः कल्पिताः केशा यस्याः सा कुंभोदरी ॥ दग्धवस्त्रा पिपासुः भोजनचिंता यस्याः सा ॥ भूषणेच्छुः एष स्त्री द्रेष्काणः
साग्निकः शुक्रसंज्ञश्च ॥ ४ ॥ अथ वृषद्वितीयं स्वागतयाह ॥ क्षेत्रेति ॥ केदारेषु शाल्यादिषु वेश्मसु धेनुषु नलगीतवादित्रादिषु कुशलः ॥ हलशकटयोः प्रवीणः ॥ वृषस्कंधः ॥ बुभुक्षुः ॥
छागमुखः ॥ मलिनांबरः ॥ एष चतुःपदद्रेष्काणो बुधसंज्ञः ॥ ५ ॥ वृषतृतीयं मौक्तिमालयाह ॥ द्विपेति ॥ महाशरीरः ननु हस्तिवपुः श्वेतदंतः ॥ वरूत्पादः नखपादचरणः कपिलांगः
अवीनां मृगाणां लोमार्ध्यं व्यग्रचित्तं यस्य सः ॥ एष चतुःपदद्रेष्काणः शनिसंज्ञः ॥ ६ ॥ मिथुनाद्यं वसंततिलकेनाह ॥ सूच्येति ॥ सूच्याश्रितकर्म सीवनक्रियातामिच्छति ॥ स्त्री सुरूपा भूष-
णकार्ये कृतप्रयत्ना ॥ अनपत्या ॥ ऊर्ध्वबाहुः रजस्वला एष स्त्री द्रेष्काणो बुधसंज्ञः ॥ ७ ॥ मिथुनद्वितीयमुपजात्याह ॥ उद्यानेति ॥ उपवनस्थः चर्मभृत् ॥ चापहस्तः खगप्रियः शस्त्रधर्त्ता ॥ ग-

[illegible]

व.म.टी.
६३

मिथुनतृतीयस्वागतयाह ॥ भूषितइति ॥ अलंकृतः समुद्रवत्रभृतमणिः ॥ इषुधारी ॥ वर्मभृत् ॥ चापधरः ॥ नृत्यवादित्रेवित्तादिकलासु च प्रवीणः ॥ कविलक्षः ॥ एषनर
द्रेष्काणो सायुधध शनिशक्तः ॥ ९ ॥ कर्कीद्येस्वागतयाह ॥ पत्रेति ॥ पत्राणिमूलानिफलानिचधरति ॥ गजशरीरः ॥ वनेचंदनवृक्षगतः सरभतुल्यपादः ॥ सूकरमुखः ॥
अश्वग्रीवः ॥ एषचतुःपद्द्रेष्काणोनरस्त्वंद्रशक्तः ॥ १० कर्कद्वितीयमिंद्रवज्रयाहपद्मेति ॥ नारीशिरसिकमलैः रजिता सर्पयुता ॥ कठिनांगी ॥ यौवनयुतेत्यर्थः ॥ वने
आक्रोशति ॥ पलाशतरूशाखासक्ता ॥ एषस्त्रीव्यालद्रेष्काणो भौमसक्तः ॥ ११ ॥ कर्कतृतीयंवैतालीयेनाह ॥ भार्येति ॥ जायाया आलंकारनिमित्तंसमुद्रेनाविगतःभु
जगावृतांगोयातिकनकाभरणवान्नचिपिटमुखः एषनरोव्यालोगुरुसक्तः ॥ १२ ॥ सिंहाद्यंरथोद्धतयाह ॥ शाल्मलेरिति ॥ गृध्रः पक्षी ॥ शृंगालः ॥ सारमेयः मलिनवस्त्रो

व भूषितो वरुणौ द्रुरत्नो वद्धतूणकवचः सधनुष्कः ॥ नृत्तवादित्रकलासु च विद्वान्काव्यकृन्मिथुनराशिपवसानो ॥ ९ ॥ पत्रमूलफलभृद् द्विपकायः
दे काननेमलयगः शरभांघ्रिः क्रोडतुल्यवदनो हयकंठः कर्कप्रथमरूपमुशंति ॥ १० ॥ पद्मार्चितामूर्द्धनिभोगियुक्ता स्त्री कर्कशारण्यगताविरौति ॥ शा
खांपलाशस्य समाश्रिता च मध्ये स्थिता कर्कटकस्य राशेः ॥ ११ ॥ भार्याभरणार्थमर्णवं नौस्थोगच्छतिसर्पवेष्टितः ॥ हेमैश्चयुतो विभूषणैश्चिपिटा
स्योन्त्यगतश्च कर्कटे ॥ १२ ॥ शाल्मलेरुपरिगृध्रजंबुकौ श्वानरश्च मलिनांबरान्वितः ॥ रौति मातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्यते ॥ १३ ॥ ह
द्वि याकृतिः पांडुरमाल्यशेखरो बिभर्त्ति कृष्णाजिनकंबलं नरः ॥ दुरासदः सिंह इवात्तकार्मुको नताग्रनासो मृगराजमध्यमः ॥ १४ ॥ ऋक्षाननो वानरतुल्यचेष्टो
बिभर्त्ति दंडं फलमामिषं च ॥ कूर्ची मनुष्यः कुटिलैश्च केशैर्मृगेश्वरस्यांत्यगतस्त्रिभागः ॥ १५ ॥

जनकजननीविरहीनरश्चशाल्मलतरूपरि क्रोशति ॥ एषद्रेष्काणोनरः चतुःपद्खगसंज्ञः सूर्यसक्तश्च ॥ १३ ॥ सिंहद्वितीयवंशस्थेनाह ॥ हयाकृतिरिति ॥ तुणाकारः
श्वेतपुष्पशिरः ॥ नरः ॥ नरः कृष्णमृगत्वचर्मंचधारयति ॥ केसरीवदुःसाध्यः ॥ गृहीतधनुःनम्रनासिकाग्रः एषनरश्चतुःपदः सायुधोगुरुशक्तः ॥ १४ ॥ सिंहतृतीयमु
पजात्याह ॥ ऋक्षेति ॥ भल्लूकमुखः कपिस्वभावः आयुधमाद्रिफलंमांसंचधारयति ॥ दीर्घश्मश्रुः कुंचितकेशोरूपलक्षितोनरः ॥ एषनरश्चतुःपदः सायुधः कु
जशक्तः ॥ १५ ॥ कन्याद्यमुपजात्याह ॥ पुष्पेति ॥ कुसुमपूरितकुंभेनोपलक्षितामलिनवलिनवस्त्रवेष्टितशरीरा ॥ वासोद्वयोः संबंधमिच्छती गुरुकुलेषिता कन्या ॥

कन्याद्रेष्काणे तृतीयं वैतालीयेनाह ॥ पुरुषइति ॥ यथाक्षराणि लिख्यंते सा लेखनी तद्हस्ता तया येनाङ्कः श्यामवर्णः परिवेष्टितमस्तकः ॥ वस्त्रशिरा इति पाठे संयतमूर्द्धा ॥ धनस्य आयव्ययवणकः ॥ विस्तीर्णधनुर्द्धारी ॥ लोमशः ॥ ईदृशो नरः ॥ एव नरद्रेष्काणः सायुधः शनिसुतः ॥ १७ ॥ कन्यातृतीयमुपजात्याह ॥ गौरीति ॥ गौरवर्णा प्रक्षालितान्यम्बराणि प्रांतभागायस्या ईदृशेन उकूलेनाच्छादिता ॥ उकूलहस्तेति पाठे उच्चाघटदर्भयुतपाणिः ॥ सुरगृहं गंतुमुद्यता ॥ समासितार्ढ ईदृशी नारी एष स्त्री द्रेष्काणः शुक्रसक्तः ॥ १८ ॥ तुलाद्यं वसंततिलकेनाह ॥ वीथ्यंतरेति ॥ मार्गमध्ये पण्यं हट्टस्तत्र स्थितः धटसहितः ॥ उन्मानेऊर्ध्वमाने तुलारूपे माने तिर्यग्माने कुडवादौ

पुष्पमूल्यं वीणघटे नकस्यामलप्रदिग्भां च रसं चतांगी ॥ वस्त्रार्थसंयोगमभीप्सुमानागरौ कुलं वांछति कन्यका द्या ॥ १९ ॥ पुरुषः पुरुहीतलेखनिः श्यामो वस्त्रशिराव्यपायकृत ॥ विपुलं च विभर्त्ति कार्मुकं रोमव्याप्ततनुश्च मध्यम ॥ १७ ॥ गौरी सुधौतायदुकूलगुप्तासमुच्छ्रिता कुंभर्दच्छुहस्ता ॥ देवालयं स्त्री प्रयता प्रवृत्ता वदंति कन्यां त्वांतत्स्त्रिभागं ॥ १८ ॥ वीथ्यंतरापणगतः पुरुषस्तुलावा चानुन्मानकुशलः प्रतिमानहस्तः ॥ भांडं विचिंतयति तस्य च मूल्यमेतद्रूपं वदंति यवनाः प्रथमं तुलायाः ॥ १९ ॥ कलशं परिगृह्य विनिपतितुं समभीप्सति निर्गत्य घतुरवः पुरुषः ॥ क्षुधितस्तृषितश्च कलत्रसुतान्मनसैति तुलाधरमध्यगतः ॥ २० ॥ विभीषयंस्तिष्ठति रत्नचित्रितो वने मृगान्कांचनतूणवर्म्मभृत् ॥ धनुर्द्धरो वानररूपभृत्नरस्तुलावसानेय वनेरुद्राहृतः ॥ २१ ॥ वस्त्रैर्विहीनाभरणैश्च नारी महासमुद्रात्समुपैति कूलं ॥ स्थानच्युता सर्पनिबद्धपादा मनोरमा वृश्चिकराशिपूर्वः ॥ ॥ २२ ॥ स्थानसुखान्यभिवांछति नारी भर्त्तृकृते भुजगावृतदेहा ॥ कच्छपकुंभसमानशरीरा वृश्चिकमध्यमरूपमुशन्ति ॥ २३ ॥ २३ ॥ २३ ॥

चप्रवीणः ॥ येन स्वर्णरत्नादि परिच्छिद्यते तत्प्रतिमानं हस्ते यस्य ॥ भांडं क्रयद्रव्यं तस्य मूल्यं च मध्यापतिदृदृशो नरस्तु लाधो पवनोक्तः ॥ एष नरद्रेष्काणः शुक्रस्य ॥ १९ ॥ तुलाद्वितीयं तोटकेनाह ॥ कलशमिति ॥ तुलामध्यस्थो नरो यतः क्षुधातृषी भार्यापुत्रांश्च मनसा यतिस्मरति ॥ ततो घटमादाय निर्गंतुमिच्छति गृहात् ग्रासः एष नरद्रेष्काणः स्वगः शनिसुतः ॥ २० ॥ तुलातृतीयं वंशस्थेनाह रौविभीषयन्निति ॥ मणिभूषितः सुवर्णेषुधिधारी स्वर्णकवचधारी ॥ धनुर्धरो देववादः सायुधो बुधस्य श्च ॥ २१ ॥ वृश्चिकाद्यमुपजात्याह ॥ वस्त्रैरिति ॥ वासोभिर्भूषणैश्च रहिता स्थानभ्रष्टा ॥ भुजगैनिपमितचरणा ॥ सुंदरी स्त्री महासमुद्रान्तीरमायाति एष स्त्री द्रेष्काणो भौमः कालःकुजः शस्त्रः ॥ २२ ॥ वृश्चिकद्वितीयं दोधकेनाह ॥ स्थानेति ॥ सर्पाच्छादितांगी कूर्मपृष्ठघटतुल्यदेहा नारी पतिनिमित्तं स्थानं सुखानि चेच्छति ॥ स्त्रीव्याल द्रेष्काणो गुरुश्च ॥ २२

ब्रि.क्लं.
६४

वृश्चिकतृतीयं भुग्न्निलायमाह ॥ पृथुलेति ॥ विस्तीर्णचिपिटं कच्छपसदृशमुखं यस्य सः ॥ सारमेयः हरिणाजं वृकक्रोडानां भयं करोतीति सारमेयाद्युत्पत्तिस्थानं रक्षति सिंहादृश्च ॥ एष नरचतुष्पदद्रेष्काणः श्वांदसक्तः ॥ २४ ॥ धनुः प्रथममिदृच्छया ह ॥ मनुष्यवक्त्र इति ॥ नराननः तुरगसदृशदेहः ॥ तपस्विनामाश्रमागते इष्टा आपरीर्घमाददायय ज्ञोपकरणानि स्रुक्सुवादीनि तापसाश्रमान्पालयति ॥ एष नरचतुष्पदद्रेष्काणः सायुधो गुरुशक्तः ॥ २५ ॥ धनुर्द्वितीयमुपजातमाह ॥ मनोरमेति ॥ चित्ताह्लादकरी ॥ चंपकपुष्पैः ॥ कनकेन च तुल्यद्युतिर्नीतिशोभना ॥ सागरमणीश्चालयंती स्त्री सिंहासनेति ष्ठति ॥ एष स्त्रीद्रेष्काणः कुजशक्तः ॥ २६ ॥ धनुस्तृतीयमुपजातमाह ॥ कूर्चीति ॥ दीर्घश्मश्रुः सुवर्णचंपकपुष्पसमकांतिः सिंहासनस्थो नरो दंडहस्तो दुकूलमृगचर्मणी धारयतीति नरद्रेष्काणः सायुधो रक्तशक्तः

पृथुलचिपिटकूर्मतुल्यवक्त्रः श्वमृगवराहशृगालभीषकारी ॥ अवति च मलयाकरप्रदेशं मृगपतिरंत्यगतस्य वृश्चिकस्य ॥ २४ ॥ मनुष्यवक्त्रोऽश्वसमानकायो धनुर्विगृह्यायतमाश्रमस्थः ॥ क्रतूपयोग्यानि तपस्विनश्च रक्षत्यर्वा धनुषस्त्रिभागः ॥ २५ ॥ मनोरमा चंपकहेमवर्णा भद्रासनेति ष्ठति मध्यरूपा ॥ समुद्ररत्नानि विघट्टयंती मध्यत्रिभागो धनुषः प्रदिष्टः ॥ २६ ॥ कूर्ची नरो हाटकचंपकाभो वरासने दंडधरो निषण्णः ॥ कौशेयकान्युद्वहतेऽजिनं च तृतीयरूपं नवमस्य राशेः ॥ २७ ॥ रोमचितो मकरोपमदंष्ट्रः सूकरकायसमानशरीरः ॥ योक्त्रकजालकबंधनधारी रौद्रमुखो मकरप्रथमस्तु ॥ २८ ॥ कलास्वभिज्ञाब्जदलायताक्षी श्यामा विचित्राणि च मार्गमाणा ॥ विभूषणालंकृतलोहकर्णा योषा प्रदिष्टा मकरस्य मध्ये ॥ २९ ॥ किन्नरोपमतनुः सकंबलस्तूणचापकवचैः समाचितः ॥ कुंभमुद्वहति रत्नचित्रितं स्कंधगं मकरराशिपश्चिमः ॥ ३० ॥ स्नेहमद्यजलभोजनागमव्याकुलीकृतमनाः सकंबलः ॥ कोशकारवसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः ॥ ३१ ॥

॥ २७ ॥ मकराद्यद्रेष्काणमाह ॥ रोमचित इति ॥ लोमशांगः मकरतुल्यदंष्ट्रः ॥ वराहतुल्यदेहः ॥ योक्त्रं वृषभयोजनं ॥ जालं पक्षियाह्वकं बंधनं निगडादि एतत्त्रयं धारयन् रौद्रशीलः ॥ विकृताननः ॥ एष नरद्रेष्काणः सनिगडः शनिशक्तश्चतुष्पदः ॥ २८ ॥ मकरद्वितीयमुपजातमाह ॥ कलास्विति ॥ नृत्यादिकलाप्रवीणा पद्मपत्रनेत्रा श्यामवर्णा ॥ नानावस्तून्यन्वेषयंती ॥ आभरणैः शोभिता लोहाभरणयुक्तकर्णा नारी एष स्त्रीद्रेष्काणः शुक्रशक्तः ॥ २९ ॥ मकरतृतीयं द्रेष्काणमाह ॥ किंनरेति ॥ देवयोनिसमांगः कंबलयुतः इषुधिधनुर्वर्मसहितो नरो मणिभूषितमंसगतं घटं धारयति ॥ एष नरद्रेष्काणः सायुधो बुधशक्तः ॥ ३० ॥ कुंभाद्यद्रेष्काणमाह ॥ स्नेहेति ॥ तैलसुरामानीयाश्च नानाप्राप्त्याग्रे चिंतयमानः ॥ ऊर्णायुतः दुकूलवासा मृगचर्मयुतः गृध्रपक्षिसमास्यः ॥ एष नरद्रेष्काणः खगशनितयाह ॥

ला

रा

राम
६४

127

कुंभद्वितीयं वैतालीयेनाह ॥ दग्धेरति ॥ मलीमसां वरा मस्तकारोपित भांडा वन्हिदग्धो शाल्मलितरु युते शाकटे स्थिता स्त्री अरण्ये लोहानि गृह्णाति ॥ एष
स्त्री द्रेष्काणः सात्त्विको बुधशात्तः ॥ ३२ कुंभतृतीयमिन्द्रवज्रयाह ॥ श्यामइति ॥ कृष्णवर्णो लोमशः कर्णौ मोलियुतो नरः त्वकचर्म ॥ पत्राणि दलानि निर्यासो वृक्षरसः गुग्गुलादिः फलमाम्रादि ॥ एतैः सहलोह युतानि पात्राणि धारयति ॥ तानि चेतस्ततश्चालयति स्थानांतरं नयतीत्यर्थः ॥ एषनरद्रेष्काणः पुरुष
रू ॥ ३३ ॥ मीनाद्यमिन्द्रवज्रयाह ॥ सुग्भांडेति ॥ यज्ञोपकरणानि ये मुक्ताफलैः रत्नैः शंखैश्च कीर्तैर्यग्रहस्तस्त्राभरयुतो नरः स्त्रीणां भूषणनिमित्तं नावारू
त्वा समुद्रं गच्छति ॥ एषनरद्रेष्काणो गुरुसत्त्वः ॥ ३४ ॥ मीनद्वितीयं वसंततिलकेनाह ॥ अत्यच्छि तेति ॥ वर्णेन कांता चंपककुसुमं पुष्पाति तिरस्करोति चंप

नपठेत

ग दग्धे शकटे स शाल्मले लोहान्याहरते नाचने ॥ मलिनैः संवृत्ता भांडैर्मूर्द्धि गतैश्च मध्यम ॥ ३२ ॥ श्यामः सरोम श्रवणः किरीटी त्वक्पत्र निर्यासफलैर्विभर्त्ति ॥ भांडानि लोहव्यतिमिश्रितानि संचारयत्यंस्तगतो घटस्य ॥ ३३ ॥ स्रुक्कुभांड मुक्तामणिशंखमिश्रैर्व्याक्षिप्तहस्तः सविभूषण

या श्व ॥ भार्याविभूषार्थमपांनिधाने नौप्लव सागरमेति भत्षस्य ॥ ३४ ॥ अत्युच्छ्रित ध्वजपताक सुपेतिपोतं कूलं प्रयातिजलधेः परिवारयुक्ता ॥ वर्णे
न चंपकमुखा प्रमदा द्वितीयो भागो मीनस्य चैवकथितो मुनिभिर्द्वितीयः ॥ ३५ ॥ स्वभ्रांतिके सर्प वेष्टितांगो वस्त्रैर्विहीनः पुरुषस्तृतीये चौरानल
व्याकुलितांतरात्मा विक्रोशतेसोपगतो भत्षस्य ॥ ३६ ॥ इतिश्रीवराहमिहरविरचिते बृहज्जातके द्रेष्काणाध्यायः पंचविंशतिः २५ ॥ २५ ॥

कमुखी कनकवर्णसखीयुता स्त्री उच्चः ध्वजाः पताकाश्च पत्रे दशं यो तं नावं आरोहति समुद्रस्य तटं प्रयाति च ॥ एष स्त्री द्रेष्काणश्च द्रशात्तः ॥ ३५ मीनतृतीयद्रेष्का
णमिन्द्रवज्रयाह ॥ श्वभ्रांतिकेति ॥ भुजगावृत देहो नग्नस्तस्करवन्हि व्याकुलचित्तो नारी वने चर्त्तसमीपे रोदिति एष धालद्रेष्काणः कुजशात्तः ॥ ३६ ॥ द्रेष्काण
स्वरूपस्य प्रयोजनं स्थले स्थले प्रोक्तं ॥ यात्रायां चवक्ष्यति ॥ द्रेष्काणाकारत्वे यद्गुण सदृशफलं योजयेद्दृष्टिरेतो द्रेष्काणे सौम्यरूपे कुसुमफलयुते रत्नभांडा
न्विते च ॥ सौम्यैर्दृष्टे जयः स्यान ग्रहणसहिते पापदृष्टे च भगाः साग्रे दाहो ऽथवंधः सभुजनिगडे पापयुक्ते विपाशेरिति ॥ अश्मे चौरज्ञानं अंशकात्तन्नापते द्रष्ट
द्रेष्काणोस्तस्कराः स्मृताः ॥ राशिभ्यः कालविद्रेष्काणो वयोजाति श्वलप्रयाव ॥ ३६ ॥ इतिश्री महीधरकृते ज्ञानकविवरणे द्रेष्काणाध्यायः पंचविंशः ॥ २५ ॥ श्री ॥

128

वृ०जा०टी०
६५

अथोपसंहाराध्यायः॥ तत्रादौ कविः पित्रादिनामानि वसंततिलकेनाह॥ आदित्येति॥ आदित्यदासनाम्नो विप्रस्य पुत्रस्तस्मादादित्यदासादेव प्राप्तज्ञानः कापित्थकग्रामे यः सवितारविलदाराधनेन तस्मात्प्राप्तो वररूपो प्रसादो येन सः॥ आवंतक उज्जयनीवासी वराहमिहिराचार्यो मुनिमतानि सम्यक्‌ संप्रदायनविचार्य शोभनां होराजातकं शास्त्रं कृतवान्॥१॥ अध्यायसंग्रहमुपजात्याह॥ राशीति॥ राशिभेदाध्यायः प्रथमः॥ ग्रहयोनिभेदो द्वितीयः २ वियोनिजन्मा तृतीयः ३ निषेकाध्यायश्चतुर्थः ४ जन्माध्यायः पंचमः ५ रिष्टाध्यायः षष्ठः ६ आयुर्दायाध्यायः सप्तमः ७ दशाध्यायोऽष्टमः ८ अष्टकवर्गो नवमः ९ शोभनानां संज्ञा शालिनीमाह॥ कर्मेति॥ कर्माजीवो दशमः १० राजयोगो एकादशः॥ नाभसयोगो द्वादशः १२ चंद्रयोगस्त्रयोदशः

आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः॥ आवंतको मुनिमतान्यवलोक्य सम्यग्घोरां वराहमिहिरो रुचिरां चकार॥१॥ राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथ निषेककालः॥ जन्माथ सद्यो मरणं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञः॥२॥ कर्माजीवो राजयोगाः स्वयोगाश्चांद्रा योगा द्विग्रहाद्याश्च योगाः॥ प्रव्रज्याथो राशिशीलानि दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः॥३॥ नेष्टा योगा जातकं कामिनीनां निर्याणं स्यान्नष्टजन्मर्क्षकाणाः॥ अध्यायानां विंशतिः पंचयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये॥४॥ प्रश्नास्तिथिर्भं दिवसः क्षणश्च चंद्रो विलग्नं लघलग्नभेदः॥ शुद्धिर्ग्रहाणामथवापवादो विमिश्रकाख्यं तनुवेपनं च॥५॥ अतः परं गुह्यकपूजनं स्यात्स्वप्नं ततः स्नानविधिः प्रदिष्टः॥ यज्ञो ग्रहाणामथ निर्गमश्च क्रमात्स्मृतः शाकुनोपदेशः॥६॥

॥ यदीयनिर्गमन प्रकीर्णः १९॥ द्विग्रहयोगश्चतुर्दशः १४॥ प्रव्रज्याध्यायः पंचदशः १५ राशिशीलं षोडशः १६ दृष्टिफलं सप्तदशः १७ भावाध्यायोऽष्टादशः १८॥ आश्रयएकोनविंशः १९ प्रकीर्णो विंशः २० ३ नेष्टा इति॥ अनिष्टयोगएकविंशः २१ स्त्रीजातकं द्वाविंशः २२ निर्याणं त्रयोविंशः २३ नष्टजन्म चतुर्विंशः २४ द्रेष्काणाध्यायः पंचविंशः २५ एवं जातके पंचविंशतिरध्यायाः॥ इदानीं यात्रिकं योगयात्रायां निबद्धमध्यायसंग्रहमहं कथयिष्ये॥ तदेवोपजातित्रयेणा ४ प्रश्न इति॥ प्रश्नाध्यायः तिथिवलाध्यायः २ नक्षत्रं ३ दिवसो वारफलं ४ मुहूर्ताध्यायः ५ चंद्रबलं ६ लग्ननिश्चयः ७ लग्नभेदा होराद्रेष्काणादयः ८ ग्रहाणां शुद्धिः कुंडलिकाफलं ९ अपवादाध्यायः १० मिश्रकाध्यायः ११ अंगस्फुरणं १२॥५॥ अत इति॥ गुह्यकार्चनं १३ स्वप्नाध्यायः १४ स्नानविधिः १५ ग्रहयज्ञः १६ प्रस्थानं १७ शाकुनाध्यायः॥१८॥ ॥६॥ ६॥ ६॥

मू
त्रा

वृ
६५

बृहज्जा॰ म॰ टी॰
९ ६६

विवाहेति॥ विवाहकालः १९ ग्रहस्फुटता २० ग्रहकरणस्य विस्तीर्णशाखा २१ एवं ज्योतिर्विदां हिताय त्रिभिः स्कंधैर्गणित होरासंहिताख्यैरयं मया ज्योतिषशास्त्रसंग्रहो रचितः ७॥ संक्षेपकरणं मालिन्याह॥ पृथ्वीति॥ एतत्सकलं शास्त्रमेमेराचार्यैर्विस्तीर्णं कृतं तदेतन्मया स्वल्पं कृतं॥ कीदृशं॥ लस्त्रदेशार्थं। तेराचार्यैः रूपस्थित्यर्थायत्र। तथा धिषणाविमलत्वे बुद्धिसगनिर्मलीकरणे क्षमं॥ ग्रहग्रंथे मम यत्र दुरूक्रमप्रभमुक्तं तत्पंडितैः क्षम्यतां॥ ८॥ सवात्रार्थनं वसंततिलके

९

विवाहकालः करणग्रहाणां प्रोक्तं पृथक् तद्विपुलाव शाखा॥ स्कंधैस्त्रिभिर्ज्योतिषसंग्रहोयं मयाकृतो दैवविदां हिताय॥ ७॥ पृथुविरचितमन्यैः शास्त्रमेतत्समस्तं तदनुलघुमपेदं तत्प्रदेशार्थमेव॥ कृतमिह [illegible] समर्थधीविषाणामलत्वे मम यदिह दुरुक्तं सज्जनैः क्षम्यतां तत्॥ ८॥ ग्रंथस्य यत्प्रचरतो [illegible] विनाशमेति लेख्याद् बहुश्रुतसुखाधिगमक्रमेण॥ यद्वा मया कुकृतमल्पमिहाकृतं वा कार्यं तदत्र विदुषा परिहृत्य रागं॥ ९॥ दिनकरमुनिगुरूणां प्रणिपातकृतप्रसादमतिनेदं॥ शास्त्रमुपसंगृहीतं नमोस्तु पूर्वप्रणेतृभ्यः॥ १०॥ इति श्री वराहमिहिरविरचिते बृहज्जातके विवरणोपसंहाराध्यायः षड्विंशः॥ २६॥ २६॥ २६॥ २६ ॥ २६॥ श्रीगणपतये नमः॥ श्रीकृष्णायनमः॥ श्री विश्वेश्वरायनमः

उ

॥ ग्रंथस्येति॥ प्रचरमाणस्यास्य ग्रंथस्य यत्नलेख्यात्लेखकदोषान्नश्यति॥ यद्वात्र मया यत्कुत्सितं कृतं अल्पं वा कृतं कर्तव्यं न कृतं वा ततद्बहुश्रुतानां पंडितानां रागं विहाय कार्यं मद्योजनाशनीयः शोधनीयश्चेत्यर्थः॥ ९॥ शास्त्रावसाने सतां नतिमार्यया॥ दिनकरेति॥ दिनकरवातयोगधिगमोद्यानं तत्परिपाप्य विदुषा मात्सर्यं विहाय कार्यं मद्योजनाशनीयः शोधनीयश्चेत्यर्थः ... प्रसादेनेर्मलं यस्याः ईदृशी मतिर्यस्य तेन मयेदं शास्त्रमुपक्षिप्तं॥ तस्मात्पूर्वप्रणेतृभ्यः पूर्वशास्त्रकर्तृभ्यो रवेर्वसिष्ठादिमुनीनामादित्यदासस्य च चरणानां साक्षात्कृतः प्रसादेन निर्मलं यस्याः ईदृशी मतिर्यस्य तेन मयेदं शास्त्रमुपक्षिप्तं। तस्मात्पूर्वप्रणेतृभ्यः पूर्वशास्त्रकर्तृभ्यो नतिरस्तु॥ १०॥ इति श्रीमहीधरकृते बृहज्जातकविवरणे उपसंहाराध्यायः षड्विंशति २६॥ छ॥ सम्वत् १८९६ समये कार्तिक कृष्ण ३० चंद्रवासरे। लिखितं दौलतरामेण

राम
६६

[OrderDescription]
,CREATED=03.07.20 10:35
,TRANSFERRED=2020/07/03 at 10:59:23
,PAGES=130
,TYPE=STD
,NAME=S0003262
,Book Name=M-1854-BRIHJJATAK VIVRAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,